॥ श्रीः ॥

अनुभूतिस्वरूपाचार्यप्रणीतं

सारस्वतंनामकंव्याकरणं।

तदेतत्

पद्दुर्गवास्तव्यसूर्यदत्तशास्त्रि-

संपादित-

[illegible]

श्रीधरात्मज कृष्णलाल-

शर्मणा

स्वकीये "ज्ञानसागर" यन्त्रालये

[illegible]

...सूत्रेषु ...६४ सन् १९०७

...मुद्रणाद्यधिकारः स्वायत्तीकृतः।

विज्ञापनमिदम्.

महाभारतप्रभृतीतिहासा भागवतप्रमुखपुरा
स्तोत्राणि च सहस्रनामादीनि अन्येपि नाटक
भाण-चंपू-न्याय-प्रभृतिग्रंथाः शतशः
सीसकाक्षरैः शिलाक्षरैश्च मुद्रिताःपण्ये
प्रतिष्ठापिताः सन्ति तैश्च ग्राहका
मूल्यप्रेषणेन सूचनानुसारं
सनाथा भविष्यन्ति.

श्रीमत्सुदत्ताचिह्नक
कृष्णलाल

॥ श्रीः ॥

सारस्वतं व्याकरणम् ।

श्रीगणेशाय नमः ।

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ॥ सार
स्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम् ॥१॥ इन्द्रा-
दयोऽपि यस्यान्तं न ययुः शब्दवारिधेः ॥ प्रक्रि-
यां तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथम् ॥ २ ॥ तत्र
प्रत्यासंज्ञा संव्यवहाराय संगृह्यते ॥

[अइउऋऌसमानाः १]-अनेन प्रत्याहारग्रह-
णाय वर्णाः परिगण्यन्ते तेषां समानसंज्ञा च विधी-
यते नैतेषु सूत्रेषु सन्धिरनुसन्धेयोऽविवक्षितत्वात-
न्ततस्तु सन्धिर्भवतीति नियमात् लौकिकप्रयो-
गनिवृत्तये समयमात्रत्वाच्च ॥ १ ॥

[ह्रस्वदीर्घप्लुतभेदाः सवर्णाः[1] २]-एतेषां ह्रस्व-दीर्घप्लुतभेदाः परस्परं सवर्णा भण्यन्ते। लोकाच्छे-षस्य सिद्धिरिति वक्ष्यति ततो लोकत एव ह्रस्वादि-संज्ञा ज्ञातव्या। एकमात्रो ह्रस्वः, द्विमात्रो दीर्घः त्रिमात्रः प्लुतः। व्यञ्जनञ्चार्धमात्रकम्। एषां मध्ये-तूदात्तादिभेदाःसन्ति। उच्चैरुपलभ्यमान उदात्तः नीचैरनुदात्तः। समवृत्त्या स्वरितः। एऐओऔ सन्ध्यक्षराणि एषां ह्रस्वा न संति ॥ २ ॥

[उभये स्वराः ३]-अकारादयः पञ्च, चत्वार एकारादय इत्युभये स्वरा उच्यन्ते ॥ ३ ॥

[अवर्ज्जा नामिनः ४]-अवर्णवर्ज्जाः स्वरा नामिन उच्यन्ते। अनुक्रान्तास्तावत् स्वराः। प्र[...] जिग्राहयिषया व्यंजनान्यनुक्रामति यहवर[...]य नङम झढधघभ जडदगब खफछठथ[...] [...]विधि शषसेति ॥ ४ ॥

---

१ समानो वर्णो धर्मो येषु ते तथा। २ अनुक्रमेण [...]

[आद्यन्ताभ्याम् ५]—प्रत्याहारं जिघृक्षता आद्यन्ताभ्यामेते वर्णा ग्राह्याः आदिवर्णोऽन्त्येन सह गृह्यमाणस्तन्नामा प्रत्याहारः । तथाहि—अकारो वकारेण सह गृह्यमाणोऽवप्रत्याहारः, स च अइउऋऌएऐओऔहयवरलञणनङमझढधघभजडदगब इत्येतावत्संख्याकः संपद्यते । चटतकप—इति—चपप्रत्याहारः । जडदगब—इति—जबप्रत्याहारः । झढधघभ-इति झभप्रत्याहारः । ञणनङम—इति—ञमप्रत्याहारः । एवं यत्र यत्र येन येन प्रत्याहारेण कृत्यं स तत्र तत्र ग्राह्यः, प्रत्याहाराणां सङ्ख्यानियमस्तु नास्ति ॥

[हसा व्यञ्जनानि ६]—हकारादयः सकारान्ता वर्णा हसा व्यंजनानि भवन्ति । स्वरहीनं व्यंजनं तेष्वकारः सुखमुखोच्चारणार्थत्वादित्संज्ञको भवति६

[कार्यायेत् ७]—प्रत्ययाद्यतिरिक्तः कस्मैचि-

---

१. ग्रहीतुमिच्छतीति (जिघृक्षति) जिघृक्षतीतिजिघृक्षन् तेन तथा ।

त्कार्यायोच्चार्यमाणो वर्ण इत्संज्ञको भवति, यस्येत्संज्ञा तस्य लोपः ॥ ७ ॥ प्रत्ययाऽदर्शनं लुक् ॥

[वर्णादर्शनं लोपः ८]—वर्णविरोधोलोपश्[1] मित्रवदागमः शत्रुवदादेशः ॥ ८ ॥

[स्वराननन्तरिता हसाः संयोगः ९]—कुचुटुतुपुवर्गाः, उकारः पञ्चवर्णपरिग्रहणार्थः ॥ ९ ॥

[अरे ओ नामिनो गुणः १०]—नामिस्थानिका अर् ए ओ एते गुणसंज्ञका भवन्ति ॥ १० ॥

[आरे औ वृद्धिः ११]—आ आर् ऐ औ एते वृद्धिसंज्ञका भवन्ति ॥ ११ ॥

[अन्त्यस्वरादिष्टिः १२]—अन्त्यो यः स्वरस्तदादिर्वर्णः स टिसंज्ञको भवति ॥ १२ ॥

[अन्त्यात्पूर्वउपधा १३]—अन्त्यात् वर्णमात्रा[2]त्पूर्वो यो वर्णः स उपधासंज्ञको भवति ॥ १३ ॥

१ एकंवर्णंनाशयातिअन्यस्योत्पात्तिंप्रातिबध्नातिसतथा । २ आक्षेपाद्वर्णमात्रोपलब्धिर्बोद्धव्या ।

[असंयोगादिपरोह्स्वो लघुः १४, विसर्गानुस्वारयोगादिपरोदीर्घश्च गुरुः १५, मुखनासिकावचनोऽनुनासिकः १६]–मुखनासिकाभ्यामुच्चार्यमाणो वर्णोऽनुनासिकः । द्विबिन्दुर्विसर्गः । शिरोबिंदुरनुस्वारः । अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च[1] । ≈ क इति जिह्वामूलीयः । ≈ प इत्युपध्मानीयः । अं इत्यनुस्वारः । अः इति विसर्गः ॥ १४ ॥ १५ ॥ १६ ॥

इति संज्ञाप्रक्रिया ॥

अधुना स्वरसंधिर्विधीयते ।

[इयं स्वरे १]–इवर्णो यत्वमापद्यते स्वरे परे दधि आनय इति स्थिते दध्य् आनय इति तावद्भवति ॥ १ ॥

---

१ चकरात्स्वस्ववर्गानुकूलस्थानमप्यवधेयम् ।

[हसेऽर्हहसः २]--स्वरात्परो रेफहकारवर्जित
हसो हसे परे द्विर्भवति–इति धकारस्य द्वित्वं, पुन
र्द्वित्वे प्राप्ते न द्विरुक्तस्य द्विरुक्तिः, द्वित्वविधान
सामर्थ्यात् द्वावेव शिष्येते अन्ये हसा लुप्यंते ॥ २

[झबे जबाः ३]–झसानां झबे परे जबा भव
न्ति। इति पूर्वधकारस्य दकारः। सवर्णत्वात् "वर्ग्यं
वर्ग्येण सवर्णः" इति वचनात्, यथासंख्यं वा वक्त
व्यम्। स्वरहीनं परेण संयोज्यम्। दद्ध्यानय इ
सिद्धम्। गौरी अत्र। अर्ह इति विशेषणान्न रेफस्
द्वित्वं किन्तु (रहाद्यंपोद्विः) स्वरपूर्वाद्रेफात्प
यपो द्विर्भवति " जलतुम्बिकान्यायेन रेफस्योर्ध्
गमनम्। " गौर्य्यत्र। स्वर इत्यनुवर्तते । एवमन्
त्रापि यत्र न सूत्राक्षरैः कार्यसिद्धिस्तत्र सर्वत्र सूत्र
न्तरात्पदानुवृत्तिर्ज्ञातव्या। ग्रन्थभूयस्त्वभयान्नास्म
भिर्लिख्यते ॥ ३ ॥

१ हकारग्रहणं ह्यर्य्यनुभवादौ द्वित्वकृते ।

[उवम् ४]–उवर्णो वत्वमापद्यते स्वरे परे । मधु-अत्र–मध्वत्र ॥ ४ ॥

[ऋरम् ५]–ऋवर्णो रत्वमापद्यते स्वरे परे । पितृ–अर्थः–पित्रर्थः ॥ ५ ॥

[ऌलम् ६]–ऌवर्णो लत्वमापद्यते स्वरे परे । ऌ–अनुबन्धः-लनुबन्धः ॥ ६ ॥

[ए अय् ७]–एकारो अय् भवति स्वरे परे । ने-अनम्-नयनम् ॥ ७ ॥

[ओ अव् ८]–ओकारो अव् भवति स्वरे परे । लो–अनम्-लवनम् । भो–अति-भवति ॥

❀ गवादेरवर्णागमोऽक्षादौ वक्तव्यः ❀

गो-अक्षः-गवाक्षः । गो-इन्द्रः-गवेन्द्रः । गो-अजिनम्-गवाजिनम् । प्र-ऊढः-प्रौढः । स्व-ईरिणी-स्वैरिणी । अक्ष-ऊहिणी--अक्षौहिणी सेना । क्वचित् स्वरवद्यकारः । यथाध्वपरिमाणे गव्यूतिः । अन्यत्र गवां मिश्रीभावे गोयूतिः ॥ ८ ॥

[ऐ आय् ९]—ऐकार आय् भवति स्वरे परे । नै—अकः—नायकः ॥ ९ ॥

[औ आव् १०]—औकार आव् भवति स्वरे परे । तौ-इह—ताविह ॥ १० ॥

[य्वोर्लोपश् वा पदान्ते ११]—पदान्ते स्थितानामयादीनां यकारवकारयोर्लोपश् वा भवति स्वरे परे । तौ-इह-ताविह, ता इह । ते-आगताः-तयागताः, तआगताः । पटो-इह-पटविह, पट इह । लोपाशि पुनर्न सन्धिः ॥ छन्दसि तु भवति हे सखे-इति-हे सखयिति, हे सखेति ॥ ११ ॥

[एदोतोऽतः १२]--पदान्ते स्थितादेकारादोकाराच्च परस्याकारस्य लोपो भवति । ते-अत्र-तेत्र । पटो-अत्र-पटोत्र ॥ १२ ॥

[सवर्णे दीर्घः सह १३]—सवर्णस्य सवर्णे परे

१ कारकविभक्तित्वान्न तृतीया ।

सह दीर्घो भवति । श्रद्धा-अत्र-श्रद्धात्र । दधि-इह-दधीह । भानु- उदयः भानूदयः ॥ १३ ॥

"अदीर्घो दीर्घतां याति नास्ति दीर्घस्य दीर्घता ॥ पूर्वदीर्घस्वरं दृष्ट्वा परलोपो विधीयते" ॥१॥

" सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत् । परेण पूर्वबाधो हि प्रायशो दृश्यतामिह " ॥ २ ॥

[अ इ ए १४]–अवर्ण इवर्णे परे सह ए भवति । तव-इदम्-तवेदम् । मम-इदम्-ममेदम् ।

❀ इलादेरीषादौ टेर्लोपो वक्तव्यः ❀

हल-ईषा-हलीषा । लाङ्गल-ईषा-लाङ्गलीषा । मनस्-ईषा-मनीषा ॥ १४ ॥

[ओमि च १५]–ओमि परे नित्यं टेर्लोपो भवति । अद्य-ओम्-अद्योम् ॥ १५ ॥

[उ ओ १६]–अवर्ण उवर्णे परे सह ओ भवति । गंगा-उदकम्-गङ्गोदकम् ॥ १६ ॥

[ऋ अर् १७]—अवर्ण ऋवर्णे परे सह अ
भवति । तव-ऋद्धिः-तवर्द्धिः ॥ १७ ॥

[क्वचिदार् १८]—अवर्ण ऋवर्णे परे सह क्वचि
दार् भवति । ऋण-ऋणम्-ऋणार्णम् । शीत-ऋतः
शीतार्तः ॥ १८ ॥

[ऌ अल् १९]—अवर्णऌवर्णे परे सह अल्
भवति । तव-ऌकारः-तवल्कारः ।
❀ ऋऌवर्णयोर्मिथः सावर्ण्यं वा वक्तव्यम् ❀
होतृ-ऌकारः-होतॄकारः ।
❀ रलयोः सावर्ण्यं वा वक्तव्यम्
परि-अङ्कः-पर्य्यङ्कः, पल्यङ्कः ॥ १९ ॥

[ए ऐ ऐ २०]—अवर्ण एकारे ऐकारे च परे स
ऐकारो भवति । तव-एषा-तवैषा । तव-ऐश्वर्यम्
तवैश्वर्यम् ॥ २० ॥

[ओ औ औ २१]—अवर्ण ओकारे औकारे च

---

१ वार्तिकमिति माधवः ।

रे सह औकारो भवति । तव-ओदनम्-तवौदनम् ।
व-औन्नत्यम्-तवौन्नत्यम् ॥ २१ ॥

[ओष्ठोत्वोर्वौ समासे २२]—अवर्ण ओष्ठोत्वोः
रयोर्वा सह ओत्वं भवति समासे सति । बिम्ब-
ओष्ठः-बिम्बौष्ठः, बिम्बोष्ठः । स्थूल-ओतुः-स्थूलोतुः,
स्थूलोतुः ॥ २२ ॥

॥ इति स्वरसन्धिः ॥

अथ प्रकृतिभाव उच्यते ।

[नामी १]—अदसः अमी शब्दः सन्धिं नप्रा-
प्नोति । अमी आदित्याः । अमी उष्ट्राः । अमी एडकाः १

[य्वे द्वित्वे २]—ई च ऊ च ए च य्वे ईकारान्त
ऊकारान्त एकारान्तश्च शब्दो द्वित्वे वर्त्तमानः स-
न्धिं न प्राप्नोति ॥ मणीवादि वर्ज्जम् ॥
अग्नी अत्र । पटू अत्र । माले आनय । मणीवादी-

---

१ ओतुर्बिडालोमार्जार इत्यमरः ।

ति किम् । मणी-इव-मणीव । रोदसी-इव-रोदसीव दम्पती-इव-दम्पतीव ॥ २ ॥

[औ निपातः ३]—आकार ओकारो निपात एकस्वरश्च[1] सन्धि न प्राप्नोति । आ एवं मन्यसे । नो अत्र स्थातव्यम् । उ उत्तिष्ठ । अ अपेहि । इ इंद्रं पश्य ॥ ३ ॥

[हैहयोरपि प्लुतः ४]—प्लुतश्च सन्धिं न प्राप्नोति । देवदत्त ३ एहि ॥ ४ ॥

[दूरादाह्वाने टेःप्लुतः ५]—दूरादाह्वाने गाने रोदने विचारे च टेः प्लुतो भवति ॥ ५ ॥

॥ इति प्रकृतिभावः ॥

अथ व्यंजनकार्यमुच्यते ।

[चपा अबे जबाः १]—पदान्ते[2] वर्त्तमानाश्चपा जबा भवन्त्यबे परे । षट्-अत्र-षडत्र । वाक्-यथा-वाग्यथा ॥ १ ॥

---

१ अत्रत्यश्चकार आकारादीनां भेदे सत्यपि निपातत्वमुद्घोषयति ।
२ य्वोर्लोपशित्यतः पदान्त इत्यनुवर्तनीयम् ।

[ञमे ञमा वा २]–पदान्ते वर्त्तमानाश्चपा ञमे परे ञमा वा भवन्ति। वाक्-मात्रम्-वाग्मात्रम्, वाङ्मात्रम्[1] ॥ षड्-मम-षड्मम, षण्मम ॥ २ ॥

[चपाच्छशः ३]–चपादुत्तरस्य शकारस्य छो वा भवति अबे परे। वाक्-शूरः-वाक्छूरः ॥ ३ ॥

[हो झभाः ४]–चपादुत्तरस्य हकारस्य झभा वा भवन्ति। यद्वर्गगश्चपस्तद्वर्गगश्चतुर्थो भवति। तत्-हविः-तद् हविः, तद्धविः, वाक्-हरिः-वाग्हरिः, वाग्घरिः ॥ ४ ॥

[स्तोः[2] श्चुभिः श्चुः[3] ५]–स्तोः सकारस्य तवर्गस्य च शकारेण चवर्गेण च योगे शकारचवर्गौ

---

१ मात्रशब्दोयमवधारणार्थः, तेन प्रत्यये परतो व्यवस्थितविकल्पाश्रयात् नित्यं ङः स्यात् तथोक्तं–काशिकायाम् "यरोनुनासिके प्रत्यये नित्यवचनं कर्तव्यं, वाङ्मयम्, कियन्मात्रं" हि व्यवस्थितविभाषादिज्ञानात् सिद्धमिति । २ स्तोरिति द्वंद्वैकत्वं पुंस्त्वं तु छान्दसम् । ३ "अकृत्वासप्तमीमेतां तृतीयामकरोन्मुनिः। श्चुनेतितस्मात्पूर्वेण सन्निपातः परेण वा ।" श्चुनेतिवक्तव्ये श्चुभिरिति बहुवचने शकारयोगे कचित्तत् श्मशानं इत्यादौ चुत्वं न भवति इति सूच्यते ।

यथासंख्येन भवतः, सकारस्य शकारः, तवर्गस्य चवर्गः ॥ कस्-चरति-कश्चरति । कस्-शूरः-कश्शूरः । तत्-चित्रम्-तच्चित्रम् ॥ तत्-शास्त्रम्-तच्छास्त्रम् ॥ ५॥

[न शात् ६]—शकारादुत्तरस्य तवर्गस्य चुत्वं न भवति । विश्-नः-विश्नः ॥ प्रश्-नः-प्रश्नः ॥६॥

[ष्टुभिःष्टुः ७]—स्तोः सकारतवर्गयोः षकारटवर्गाभ्यां योगे ष्टुर्भवति । सकारस्य षकारः तवर्गस्य टवर्गः ॥ कस्-षष्ठः-कष्षष्ठः । कस्—टीकते-कष्टीकते । तत्-टीकते-तट्टीकते ॥ ७ ॥

[तोर्लि लः ८]—तवर्गस्य लकारे परे लकारो भवति ॥ तत्-लुनाति—तल्लुनाति । भवान्-लिखति-भवाँल्लिखति ॥ अन्तस्थाद्विप्रभेदा रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च । तत्र सानुनासिक एव नकारस्य लकारो भवति ॥ ८ ॥

[नषि ९]—षकारे तवर्गस्य ष्टुत्वं न भवति ॥ भवान्-षष्ठः-भवान् षष्ठः ॥ ९ ॥

[टोरन्त्यात् १०]–पदान्ते वर्त्तमानाट्टवर्ग्गात्परस्य स्तोष्टुर्न भवति । षट्-नर-षण्नरः । षट्-सीदन्ति ॥ १० ॥

[नः सक्छते ११]–नान्तस्य पदस्य छते परे सगागमो भवति ॥ ❀ टित्किताबाद्यन्तयोर्वक्तव्यौ ❀ टित्वादादौ कित्वादन्ते॥ राजन्-चित्रम्-राजँश्चित्रम् । भवान्-तनोति-भवांस्तनोति[१] ॥ ११ ॥

[ञे चक् वा १२]–नान्तस्य पदस्य शे परे वा चगागमो भवति ॥ भवान्-शूरः-भवाञ्छूरः, भवाञ्चशूरः, भवाञ्शूरः ॥ १२ ॥

[ङ्णनो ह्रस्वात् द्विः स्वरे १३]–ङकारणकारनकारा ह्रस्वादुत्तरा द्विर्भवंति स्वरे परे पदान्ते ॥ प्रत्यङ्-इदम्-प्रत्यङ्ङिदम् । सुगण्-इह-सुगण्णिह । राजन्–इह–राजन्निह ॥ १३ ॥

---

१ यदागमास्तद्गुणीभूतास्तद्ग्रहणेनैवगृह्यन्त इति सान्तेपदेऽपदान्तवादेपि नस्यानुस्वारः ।

[छः १४]—ह्रस्वादुत्तरश्छकारो द्विर्भवति ॥१४

[खसे चपा झसानां १५]—झसानां खसे प-
चपा भवन्ति ॥ तव-छत्रम्-तवच्छत्रम् । ❀ क्वचिद्दी
र्घादपि वक्तव्यः ❀
ह्रीछः—ह्रीच्छ । म्लेछः—म्लेच्छ ॥ १५ ॥

[मोऽनुस्वारः १६]—मकारस्यानुस्वारो भवति
पदान्ते च । तम् हसति तं हसति ॥ पटुम् वृथा
पटुं वृथा ॥ १६ ॥

[नश्चापदान्ते झसे १७]—नकारस्य मकारस्य
चापदान्ते वर्तमानस्यानुस्वारो भवति झसे परे ॥
यशान्-सि—यशांसि ॥ पुम्—भ्याम्—पुंभ्याम् ॥१७॥

[यमा यपेस्य वा १८]—अनुस्वारस्य यमा वा
भवन्ति यपे परे । अस्य यपस्य सवर्णः ॥ तं-करोति

---

१. न केवलं ह्रस्वादेव किन्तु दीर्घादपि परस्य छस्य द्वित्वं स्यादिति व्यक्तव्यार्थः । २ चकारः क्वचित्क इति माधवः । तन्नेत्यन्ये । ३ चकारोऽत्रमानुकर्षणार्थः । तेन नकारस्य मकारस्येत्युपलब्धम् ।

ङ्करोति ॥ तं-तनोति-तन्तनोति ॥ संयन्ता-सँय्य-
ता ॥ १८ ॥

[यवलपरे यवला वा १९]-अनुस्वारस्य यव-
लपरे यवला वा भवंति । संवत्सरः । सँव्वत्सरः ॥ यं
लोकं-यँल्लोकम् ॥ १९ ॥

[ॅछन्दसि २०]-छन्दस्यनुस्वारो ॅकारमाप-
द्यते सशषहरेफेषु परतः । हंसः-ह ॅसः ॥ २० ॥

॥ विसर्गसन्धिर्निगद्यते ॥

[विसर्जनीयस्य सः १]-विसर्ज्जनीयस्य सका-
रो भवति खसे परे । कः-तनोति-कस्तनोति ॥ १ ॥

[सषशे वा २]-विसर्ज्जनीयस्य सषशे परे वा

---

१ कःत्सरुः कःक्षेमइत्यादौ कथं न सत्वं (उच्यते) उपरितनस्थले
...भावसाधनाय योगविभागः कर्तव्यः, स च कीदृक् विसर्जनीय-
सत्येको योगः अः इत्यपरो योगः तत्रविसर्जनीयस्येत्यनुवृत्तिं विधाये-
...मर्थः कार्यः, विसर्जनीयस्य क्वचित् अः विसर्ग एव भवति तथासति पूर्व-
...गसिद्धिरिति । २ नेदंमाधवसंमतम् ।

सकारो भवति । कः-शेते-कश्शेते । कः-षण्डः-कष्ष-
ण्डः । कः-साधुः-कस्साधुः ॥ २ ॥

[कुप्वोः ≍ क ≍ पौवा ३]–विसर्जनीयस्य
कवर्गपवर्गसम्बंधिनि खसे परे ≍ क≍पौ वा भवतः
कपावुच्चारणार्थौ । कः-करोति–क ≍ करोति
कः–पचति-क ≍ पचति । कः–पठति-क≍पठति
वाचस्पत्यादयः संज्ञाशब्दा निपातात्साधवः । यल्ल-
क्षणेनानुत्पन्नं तत्सर्वं निपातात्सिद्धम् ।
॥तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च॥
तत्-करः-तस्करः । बृहत्-पतिः–बृहस्पतिः । वाच-
पतिः-वाचस्पतिः ॥ ३ ॥

[रोऽरात्रिषु ४]–अह्नो विसर्जनीयस्य पदा-
न्ते रो भवति रात्र्यागणवर्जितेषु परतः । अः-पतिः
अहर्पतिः । अहः-गणः-अहर्गणः ॥ अ...

१ करपतिशब्दयोः परतः चोरदेवतावाचिनोस्तच्छब्द...
सुडागमस्तकारलोपश्चेत्यर्थौ बोद्धव्यः । २ अत्राह्न इत्यत अ...

शेषणात् । अहः-रात्रम्-अहोरात्रम् । अहः-रूपम्-
होरूपम् । अहः-रथन्तरम्-अहोरथन्तरम् ॥ ४ ॥

[अतोऽत्युः ५]—अकारात्परस्य विसर्जनीयस्य
कारो भवति अति परतः । कः-अर्थः-कोर्थः ॥५॥

[हबे ६]—अकारात्परस्य विसर्जनीयस्य उका-
भवति हबे परे । कः-गतः-को गतः । देवः-याति-
वो याति । मनः-रथः-मनोरथः ॥ ६ ॥

[आदबे लोपश् ७]—अवर्णात्परस्य विसर्जनी-
स्य लोपश् भवति अबे परे । देवाः-अत्र-देवा अत्र ।
ताः-वांति-वाता वांति ॥ ७ ॥

[स्वरे यत्वं वा[१] ८]—अवर्णात्परस्य विसर्जनीयस्य
वरे परे यत्वं वा भवति । देवाः-अत्र-देवायत्र ॥ ८ ॥

[भोसः ९]—भोस् भगोस् अघोस् इत्येतस्य
विसर्जनीयस्य लोपश् भवत्यबे परे । भोः-एहि-भो

---

१. माधवस्तुनेदं सूत्रमितिज्ञापनार्यैवावर्णादुत्तरस्य विसर्गस्य लोपाप-
वादो यत्वं वा भवति स्वरेपरे इति वक्तव्यमित्याह ।

एहि। भगोः-नमस्ते-भगो नमस्ते। अघोः-याहि अघो याहि॥ ९॥

[नामिनोः रः १०]—नामिनः परस्य विसर्जनीयस्य रेफो भवति अवे परे। अग्निः-अत्र-अग्निरत्र। पटुः-यजते-पटुर्यजते॥ १०॥

[उषसो रो बुधे ११]—उषसो विसर्जनीयस्य रेफो भवति बुधे परे। उषः-बुधः-उषर्बुधः॥ ११॥

[रेफप्रकृतिकस्य खपे वा १२] रेफप्रकृतिकस्य विसर्जनीयस्य खपे परे वा रेफो भवति। गीः-पतिः गीष्पतिः। गीर्पतिः॥ १२॥

[रः १३]—रेफसम्बन्धिनो विसर्जनीस्य रेफो भवत्यवे परे। प्रातः-अत्र-प्रातरत्र। अन्तः-गतः अन्तर्गतः॥ १३॥

[रि लोपो दीर्घश्च १४]—रेफस्य रेफे परे लोपो भ

१ रेफः प्रकृतिरुत्पत्तिकारणमितिताहशोविसर्गस्य खपेपरे नामिनः स्य वा रेफोभवति इतिवक्तव्यमित्यतो वार्तिकमेवं वासदेवभट्टाः।

ी पूर्वस्य च दीर्घः। पुनः-रमते-पुनारमते। शुक्तिः-
रूप्यात्मना भाति-शुक्ती रूप्यात्मनाभाति ॥ १४ ॥

[सैषाद्धसे १५]-सशब्दादेषशब्दाच्च परस्य
विसर्जनीयस्य लोपश् भवति हसे परे। सः-चरति-
चरति । एषः-हसति-एष हसति । सैषादिति
ंहिता। सैष दाशरथी रामः सैष राजा युधिष्ठिरः।
ैष कर्णो महात्यागी सैष भीमो महाबलः। इत्या-
ौ पादपूरणे सन्ध्यर्थः ॥ १५ ॥ यदुक्तं लौकिको-
ाहं तद्वेदे बहुलं भवेत्। सेमां भूम्याददे सैषामि-
्मादीनामदुष्टता ॥ १ ॥

[क्वचिन्नामिनो लोपश् १६]-नामिनः परस्य
विसर्जनीयस्य क्वचिल्लोपश् भवत्यवे परे। भूमिः-
आददे-भूम्याददे ॥ १६ ॥

...प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिद-
न्यदेव। विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं
बाहुलकं वदन्ति ॥ १ ॥

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधन्निरुक्तम्॥ २॥

वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्ययः। षोडशादौ विकारः स्याद्वर्णनाशः पृषोदरे॥ ३॥
वर्णनाशविकाराभ्यां धातोरातिशयेन यः। योगः स उच्यते प्राज्ञैर्मयूरभ्रमरादिषु॥ ४॥

॥ इति विसर्गसन्धिः॥

अथ षड्लिंगाः।

अथ विभक्तिर्विभाव्यते। सा द्विधा स्यादिस्त्यादिश्च।
[विभक्त्यन्तं पदम् १]-तत्र स्यादिर्विभक्तिर्नाम्नो युज्यते॥ १॥
[अविभक्ति नाम २]-विभक्तिरहितं धातुव

---

१ अथेत्यनेनैव विभक्तिसंज्ञा संधिप्रकरणकथनानन्तरं ये विषयं वक्ष्यन्ते तेषां विभक्तिसंज्ञा स्यात् सा च विभाव्यते प्रस्तूयते ... मारभ्यते इति विभक्तिशब्दावृत्त्या योजनीया। २ पदं द्विविधं व्युत्पन्नमव्युत्पन्नं च तत्र च व्युत्पन्नशब्दपक्षे (अविभक्तिनाम) इत्यनेन अव्युत्पन्नपक्षे (कृत्तद्धितसमासाश्च) इत्यनेन नामसंज्ञा भवति।

ातं चार्थवच्छब्दरूपं नामोच्यते। कृत्तद्धितसमा-
ाश्च प्रातिपदिकसंज्ञा इति केचित्¹ ॥ २ ॥

[तस्मात् सि औ जस् अम् औ शस् टा भ्यां भिस् ङे
ां भ्यस् ङसि भ्यां भ्यस् ङस् ओस् आम् ङि ओस्
प् १]--तस्मान्नाम्नः पराः स्यादयः सप्त विभक्तयो
वन्ति। तत्राप्यर्थमात्रैकत्वविवक्षायां प्रथमैकवच-
देव सि इति स्थिते इकार उच्चारणार्थः ॥ ३ ॥

[स्रोर्विसर्गः ४]–सकाररेफयोर्विसर्जनीयादे-
ा भवति अधातोरसे पदान्ते च। देवः। द्वित्ववि-
क्षायां देवौ। बहुत्वविवक्षायां प्रथमाबहुवचने ज-
जसो जस्येत्संज्ञायां तस्य लोपः। प्रयोजनं
सीति विशेषणार्थं। देव अस् इति स्थिते दीर्घ-
वसर्गौ देवाः।

❀ अकाराज्जसो असुक् क्वचिद्वक्तव्यः ❀

देवासः ब्राह्मणासः। द्वितीयैकवचने देव-अम्
ति स्थिते ॥ ४ ॥

---

१ पाणिन्यादयः।

[अम्शसोरस्य ५]—समानादुत्तरयोः अम्श-सोरकारस्य लोपो भवत्यधातोः । देवं । देवौ । बहुवचने देव शस् इति स्थिते शकारः शसीति विशेषणार्थः ॥ ५ ॥

[सोनःपुंसः ६]—पुँल्लिङ्गात् समानादुत्तरस्य सकारस्य नकारादेशो भवति ॥ ६ ॥

[शसि ७]—शसि परे पूर्वस्य स्वरस्य दीर्घो भवति । यदादेशस्तद्वद्भवति न तु वर्णमात्रविधौ । देवान् । तृतीयैकवचने देव टा इति स्थिते । टकारोऽनुबन्धः । टेनेति विशेषणार्थः ॥ ७ ॥

[टेनः ८]—अकारात्परष्टा इनो भवति । देवेन ॥ ८ ॥

[आङ्भि ९]—अकारस्य आकारादेशो भवति भकारे परे । देवाभ्याम् ॥ ९ ॥

---

१ सत्यासि अम्शसोरित्यकारलोपे च स्यान्नत्वं तथा सति समो वात्कुतो दीर्घ इत्यतआह (यदादेशस्तद्वदिति)

[भ्यः १०]–अकारात् परस्य भिसो भकार
ाकारादेशो भवति अ इ ए । ए ऐ ऐ । विसर्ज-
ाय: । देवैः ॥ ❁ अकारस्य भिसि छन्दस्येकारो
वक्तव्यः ❁ देवेभिः । कर्णेभिः ॥ चतुर्थ्येक-
वने देव ङे इति स्थिते ङकारो ङित्कार्य्यार्थः
र्वत्र ॥ १० ॥

[ङेअक् ११]–अकारात् परस्य ङेइत्येतस्या-
ागमोभवति । कित्वादन्ते ए अय् दीर्घः । देवाय
वाभ्यां । पूर्ववत् । चतुर्थीबहुवचने देव भ्यस्
ति स्थिते ॥ ११ ॥

[ए स्भि बहुत्वे १२] अकारस्य एत्वं भवति स-
ारे भकारे च परे बहुत्वे सति । देवेभ्यः । पञ्चम्ये-
वचने देव ङसि इति स्थिते ॥ १२ ॥

[ङसिरत् १३] अकारात्परो ङसिरद्भवति दीर्घः ।
ेवात् । देवाभ्याम् । देवेभ्यः । षष्ठ्येकवचने देव ङस्
ति स्थिते ॥ १३ ॥

१ भ्र् च भ्च् भ्भौ तस्मिन् भ्भि । २ सूच भूच स्भौ तास्मिन् स्भि ।

[ङस् स्यं १४] अकारात्परो ङस् स्य भवति
देवस्य। षष्ठीद्विवचने देव ओस् इति स्थिते ॥ १४ ॥

[ओसि १५] अकारस्य ओसि परे एत्वं भवति
देवयोः ॥ १५ ॥

[नुडामः १६] समानात्परस्यामो नुडागमो भवति। टित्वादादौ टकार उच्चारणार्थः ॥ १६ ॥

[नामि १७] नामि परे पूर्वस्य दीर्घो भवति
देवानाम्। सप्तम्येकवचने देव ङि इति स्थिते अइए
देवे। देवयोः। पूर्ववत्। सप्तमीबहुवचने देव सुप् इति
स्थिते पकारस्येत्संज्ञायां लोपः एस्मिबहुत्वे ॥ १७ ॥

[क्लिलात् षः सः कृतस्य १८] कवर्गादिल
प्रत्याहारादुत्तरस्य केनचित् सूत्रेण कृतस्य सकारस्य
षकारादेशो भवति। देवेषु ॥ १८ ॥

---

१ अत्र "टाङसिङसामिनात्स्याः" इत्येव व्याख्यातव्यं परन्तु ...
गकरणं बालबोधार्थं लाघवार्थञ्च। २ सतो द्विकार्य्यिणः कार्य्येण भवितव्य-
मिति सः षः इति निर्देष्टव्ये विपरीतनिर्देशः सष्स इति द्विसकारक...
तथा विधनार्थः।

[आमन्त्रणे सिद्धिः १९]—आमन्त्रणमभिमुखी-
करणं तस्मिन्नर्थे विहितः सिद्धिसंज्ञो भवति ॥ १९॥
[समानाद्धेर्लोपोऽधातोः २०] समानादुत्तरस्य
र्लोपो भवत्यधातोः । आभिमुख्याभिव्यक्तये हे
शब्दस्य प्राक् प्रयोगः । हे देव । हे देवौ । हे देवाः ।
एवं घटपटस्तंभकुम्भादयोऽप्यकारान्ताः पुँल्लिङ्गाः ॥
अकारान्तानामपि सर्वादीनां तु विशेषः ॥

सर्व विश्व उभ उभय अन्य अन्यतर इतर डतर
डतम कतर कतम सम सिम नेम एक पूर्व पर
अवर दक्षिण उत्तर अपर अधर स्व अन्तर त्यद्
तद् यद् एतद् इदम् अदस् द्वि किम् युष्मद् अ-

---

१ ननु प्रथमापि न सम्बोधने विधीयते “ लिंगार्थे प्रथमा ” इति वि-
क्ष्यमानत्वात् सम्बोधनस्य लिंगार्थातिरिक्तत्वाच्च यत्वामंत्रणेचेति व-
दसि तन्न सूत्रं सूत्रेष्वसत्वात् एवं तर्हि योगे विभागः कर्त्तव्यः “ आ-
मन्त्रणेसिद्धिः” इत्यत्र “ आमन्त्रणे ” इत्येकः तत्र प्रथमानुवर्तनात्
आमन्त्रणेर्थेतिप्रथमाविभक्तिर्भवति “ सिद्धिः ” इत्यपरः तत्रामंत्रणे
प्रथमा चेत्यनुवर्तते तथाचामंत्रणेयाप्रथमातस्याः सिद्धिसंज्ञोभवति इत्यर्थः ।

स्मद् भवतु एते सर्वादयस्त्रिलिंगाः। तत्र पुँल्लिङ्ग
न रूपं ज्ञेयम् ॥ २० ॥

[जसी २१]–सर्व्वादेरकारान्तात्परो ज
भवति। सर्व्वः। सर्व्वौ। सर्व्वे। सर्वं। सर्व्वौ।
र्व्वान् ॥ २१ ॥

[षुनों णोऽनन्ते २२]–षकाररेफऋवर्णे
परस्य नकारस्य णकारादेशो भवति। अन्ते स्थि
स्य न भवति। सर्वानित्यादौ ॥ २२ ॥

[अवकुप्वन्तरेपि २३]–अवप्रत्याहारेण क
र्गेण पवर्गेण च मध्ये व्यवधानेऽपि भवति नान्ये
सर्वेण। सर्वाभ्याम्। सर्वैः ॥ २३ ॥

[सर्वादेः स्मट् २४]–सर्वादेरकारान्तात्परस्य ङे

---

१ "नाममात्रग्रहणेलिंगविशिष्टस्यापिग्रहणमितिनयेन लिंगत्र
सर्वादिकार्य्यभाजोभवन्तीति तात्पर्य्यार्थः। २ सर्वादेःस्माडित्य
तदनुवर्तते। ३ ननु हरेर्नेत्रमित्यादौ कुतो न णत्वं इतिचन्न "धा
नः" इति निर्देशेन एकपद एवास्य स्वीकारात् अथैवं रामनाम
कुतो न णत्वं समासेनैकपदत्वात् इति चेन्न गर्गेनडेत्यादि
समासेनैकपदत्वेनणत्वम्।

कवचनस्य स्मडागमो भवति । सर्वस्मै । सर्वाभ्या-
सर्वेभ्यः । पञ्चम्येकवचने सर्व ङसि इति स्थिते २४
[अतः २५]—सर्वादेरकारान्तात्परस्यातः
डागमो भवति सर्वस्मात् । सर्वाभ्याम् । सर्वे-
। सर्वस्य । सर्वयोः ॥ २५ ॥
[सुडामः २६]सर्वादेः परस्यामः सुडागमो
ति सर्वेषाम् ॥ २६ ॥
[ङि स्मिन् २७]—सर्वादेरकारान्तात्परो ङि-
न् भवति । सर्वस्मिन् । सर्वयोः । सर्वेषु ॥ एवं
षादीनामेकशब्दपर्यन्तानां रूपं ज्ञेयं डतरडतमौ-
ाय तौ प्रत्ययौ ततस्तदंताःशब्दा ग्राह्याः ।पूर्वा-
नां तु नवानां जसि ईकारो वा वक्तव्यः । पूर्वे
ः । परे पराः । इत्यादि ॥

...विश्वैकशब्दाद्यन्तावयवानां उभयप्रभृतीनामपि सर्वादित्वात्सर्व-
शब्दवद्रूपाणि ज्ञातव्यानीत्यर्थः । २ नन्वत्रपाठितयोर्डतरडतमयोः प्रत्य-
यस्य केवलस्य प्रयोगाभावात् सर्वादिकार्य्यस्य प्रयोगशरणात् कथं
तद्रूपत्वमित्याशंक्याह “ डतर ” इति ।

ङसिङ्योः स्मात् स्मिनौ वा वक्तव्यौ ॥ पूर्वस्
पूर्वात् । पूर्वस्मिन् । पूर्वे इत्यादि । प्रथमचर
यडल्पार्द्धकतिपयनेमानां जसीकारो वा वक्त
प्रथमे प्रथमाः । चरमे चरमाः । शेषं देववत् ।
यडौ प्रत्ययौ ॥

❀ तीयस्य सर्वशब्दवद्रूपं ङित्सु वा वक्तव्यं
द्वितीयस्मै । द्वितीयाय । द्वितीयस्मात् । द्वि
त् । द्वितीयस्मिन् । द्वितीये । एवं तृतीयः । उ
ब्दो नित्यं द्विवचनान्तः । उभौ । उभौ । उभ
म् । उभाभ्याम् । उभाभ्याम् । उभयोः । उभ
उभयशब्दस्य द्विवचनाभावादेकवचनबहुवच
वतः । उभयः । उभये । उभयं । उभयान् । उभ
उभयैः । उभयस्मै । उभयेभ्यः । इत्यादि ॥

अकरांतः पुँल्लिंगो मासशब्दः ॥

---

१ नित्यपदेनाबन्तोप्यापा सह दीर्घे यन्मध्येपतितस्तद्ग्रह
इत्यापोप्युभग्रहणेनैव ग्रहणात् तथा स्वार्थिकानामप्यर्थभेद
न्तरभूतत्वेन उभकावितिकप्रत्ययान्तो द्विवचनान्तत्वं न व्यभि

[मासस्याल्लोपो वा २८]--मासशब्दस्याकारस्य
लोपो वा भवति सर्वासु विभक्तिषु परतः ॥ २८ ॥

[हसेपः सेर्लोपः २९] हसान्तादीबन्ताच्च परस्य
सेर्लोपो भवति । माः मासः मासौ मासौ मासः मा-
सः । मासं मासं मासौ मासौ मासः मासान्। मासा
मासेन माभ्यां मासाभ्यां माभिः मासैः । मासे
मासाय माभ्यां मासाभ्यां माभ्यः मासेभ्यः । मासः
मासात् माभ्यां मासाभ्यां माभ्यः मासेभ्यः । मासः
मासस्य मासोः मासयोः मासां मासानां । मासि
मासे मासोः मासयोः मास्सु मासेषु । हे माः हे
मासः हे मासौ हे मासौ हे मासाः । आकारान्तः
पुल्लिङ्गः सोमपा शब्दः । सोमपाः सोमपौ सोमपाः।
धातोरिति विशेषणाद्धेर्लोपो नास्ति । हे सो-
मपा सोमपां सोमपौ । बहुवचने सोमपा असू
इति श्रुते ॥ २९ ॥

[आतो धातोर्लोपः ३०] धातुसम्बन्धिन आ-
रस्य लोपो भवति शसादौ स्वरे परे। सोमपः।
मपा सोमपाभ्यां सोमपाभिः। सोमपे सोमपा-
सोमपाभ्यः। सोमपः सोमपाभ्यां सोमपाभ्यः।
मपः सोमपोः सोमपाम्। सोमपि सोमपोः सोम-
सु। एवं कीलालपा शंखध्मा प्रभृतयः॥३०॥ इ-
रान्तः पुँल्लिङ्गो हरिशब्दः। प्रथमैकवचने हरिः।

[औ यू ३१]–इकारान्तादुकारान्ताच्च पर-
यू आपद्यते। (ई ऊ भवतः)। हरी ॥ ३१ ॥

[एओ जसि ३२]–इकारान्तस्य उकारान्त-
च जसि परे एकार ओकारश्च भवति। हरयः॥३२

---

१ आकारमात्रस्य धातोः शसादौ क्वचिदप्यभावात् आतोधा-
ति व्यधिकरणषष्ठ्योः तत्र आत इति तु स्थानषष्ठी धातोरित्यवय-
तेनायमर्थः धातोरवयवस्यातो लोपः अतएवात्रार्थवद्ग्रहण[illegible]
प्रवर्तते इति मत्वाह धातुसम्बन्धिनइति। २ अत्रनाम्न इदुद[illegible]
त्तेः नाम्नइकारोकाराभ्यामित्यर्थः स्यात् योहि नाम्नइकारो[illegible]भ्यां प-
अर्थादिकारान्तादुकारान्ताच्च पर इति मत्वाह।

[धौ ३३]–इकारान्तस्य[1] उकारान्तस्य च धि-विषये एकार औकारश्च भवति। हे हरे हे हरी हे हरयः। हरिं हरी हरीन्॥ ३३॥

[टा नास्त्रियाम् ३४]–इकारान्तादुकारान्ताच्च परष्टा ना भवत्यस्त्रियां[2] विषये। हरिणा हरिभ्यां हरिभिः॥ ३४॥

[ङिति ३५]–इकारान्तस्य उकारान्तस्य च ङिति परे एकार ओकारश्च भवति। हरये हरिभ्यां हरिभ्यः॥ ३५॥

[ङस्य ३६]–एदोद्भ्यां परस्य ङसिङसोरकारस्य लोपो भवति। हरेः हरिभ्यां हरिभ्यः। हरेः हर्य्योः हरीणाम्॥ ३६॥

[ङेरौ डित् ३७]–इदुद्भ्यामुत्तरस्य ङेरौ भवति स च डित॥ ३७॥

---

१ अत्रेदुद्भ्यामित्यनुवर्तमानं पंचम्यन्तमप्यर्थात् षष्ठ्यन्तं स्यादिति मत्वाह इकारान्तस्येति॥ २ अत्रासिनेतिनिर्देशात् अस्त्रियामिति प्राश्लिष्टो नञास्ति इति मत्वाह "अस्त्रियाम्" इति॥

[डिति टेः ३८]–डिति परे टेर्लोपो भवति। ह
हर्य्योः हरिषु। एवमग्निगिरिरविकविप्रभृतयः एतै
सूत्रैः सिद्ध्यंति। उकारान्ताश्च विष्णुवायुभानु
भृतयः एतैरेव सूत्रैः सिद्ध्यन्ति। भानुः भानू भा
वः। भानुं भानू भानून्। भानुना भानुभ्यां भानुभि
भानवे भानुभ्यां भानुभ्यः। भानोः भानुभ्यां भ
नुभ्यः। भानोः भान्वोः भानूनाम्। भनौ भान्व
भानुषु। हे भानो इत्यादि ॥३८॥ सखिशब्दस्य भेद

[सेर्डिधे: ३९] सखिशब्दात्परस्य सेरधेः
भवति स च डित् डित्वाट्टिलोपः। सखा अधेरि
विशेषणादेकारो धिविषये। हे सखे ॥ ३९ ॥

[ऐ सख्युः ४०]–सखिशब्दस्यैकारो भव
पञ्चसु परेषु। षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य ज्ञेयः ४

१ चकारो हि उकारान्तत्वेपि एतामुक्तप्रक्रियांसमुच्चिनोति ॥
२ भेदः प्रक्रियाविशेषः। ३ अत्रच ऐसख्युरित्यतः सख्युरिति षष्ठ्य
मनुवर्तमानं सेरित्यनेन संबन्धात् सखिशब्दार्थस्यैकत्वे वाच्ये विहि
सेरित्यर्थः प्रत्याययति इति मत्वाह सखिशब्दादिति ॥

[द्विवचनस्यावा[1] छन्दसि ४१]–द्विवचनस्य
औ आ भवति वेदे । सखायौ सखाया सखायः ।
सखायं सखायौ सखीन् ॥ ४१ ॥

[सखिपत्योरीक्[2] ४२] सखिपतिशब्दयोरीगा-
गमो भवति टाङेङिषु परतः । दीर्घत्वं[3] न ना । सख्या ।
आगमजमनित्यम् । सखिना पतिना सखिभ्यां सखि-
भिः । सख्ये सखिभ्यां सखिभ्यः ॥ ४२ ॥

[ऋङूङे ४३] सखिपतिशब्दयोर्ऋङागमो भ-
वति ङसिङसोरकारे परे स च ङित् । सख्युः सखि-
भ्यां सखिभ्यः । सख्युः सख्योः सखीनाम् । सप्तम्येक-

---

१ अस्यात्वं छन्दसि वाच्यमित्यर्थः । ननु चात्रौ प्रथमोद्वितीयोवा इति संशय इति चेन्नसेर्द्विवचनं द्विवचनंसिः इत्यर्थात् प्रथम एव संदेहाभावात् सोरीति षष्ठ्यंतस्य "क्वचिदमाद्यन्तस्यपरत्वम्" इति परत्वम् ।
२ अत्रच "एटाङ्यो:" इत्यतः टाङी अनुवर्तेते वक्ष्यमाणंच सूत्रपाठे ङे इत्येतत्सूत्रं चतुर्थ्येकवचने इगागमं शास्ति तदप्यविशेषादन्तर्णीया ह "टाङेङिषु" इति । ३ अत्रायमाशयः यदि ह्रस्व एवेःक्रियेत तर्हि सखि इटा इतिस्थिते सवर्णदीर्घं बाधित्वान्तरंगत्वाट्टानास्त्रियामितिना भावः प्राप्नोति ईकिपुनः सत्यसतिवा सवर्णदीर्घे दीर्घत्वान्नास्तिनादेशः ॥

वचने ङेरौ डित्यौकारे कृते सखिपतिशब्दयोरीगा
मो भवति। सख्यौ सख्योः सखिषु ॥ पतिशब्द
प्रथमा द्वितीययोर्हरिशब्दवत् प्रक्रिया। तृतीया
तु सखिशब्दवत् प्रक्रिया। पतिरसमास एव सरि
वद्वक्तव्यः। ततः समासान्तस्य नादयो भवन्ति
प्रजापतिना प्रजापतये इत्यादि ॥ ४३ ॥
द्विशब्दो नित्यं द्विवचनान्तः। द्वि औ इति स्थिते

[त्यदादेष्टेरः स्यादौ ४४]-त्यदादेष्टेरकारो भव
ति स्यादौ परे। द्वौ द्वौ। द्वाभ्यां द्वाभ्यां द्वाभ्यां
द्वयोः द्वयोः। त्यदादीनां घेरभावः। त्रिशब्दो नित्
बहुवचनान्तः। त्रि जस् इति स्थिते। त्रयः। त्रीन्
त्रिभिः। त्रिभ्यः। त्रिभ्यः ॥ ४४ ॥

[त्रेरयङ् ४५]-त्रिशब्दस्यायङादेशो भवति
नामि परे। ङिदन्तस्य वक्तव्यः। त्रयाणां त्रिषु।
कतिशब्दो नित्यं बहुवचनान्तः।

❋ जस्शसोर्लुक् ❋

तिशब्दाज्जसूशसोर्लुग्वक्तव्यः । लुकि नतन्निमि-
म् । कति कति कतिभिः कतिभ्यः कतिभ्यः कती-
ं कतिषु । त्रिषु लिंगेषु चायं सरूपः ॥ ४५ ॥

ईकारान्तः पुँल्लिंगः सुश्रीशब्दः ।

[य्वोर्धातोरियुवौस्वरे ४६]—धातोरीकारो-
कारयोरियुवौ भवतः स्वरे परे । सुश्रीः सुश्रियौ
सुश्रियः । हे सुश्रीः हेसुश्रियौ हे सुश्रियः ।
सुश्रियं सुश्रियौ सुश्रियः । सुश्रिया सुश्रीभ्यां
सुश्रीभिः । सुश्रिये सुश्रीभ्यां सुश्रीभ्यः । सुश्रियः
सुश्रीभ्यां सुश्रीभ्यः । सुश्रियः सुश्रियोः सुश्रियां ।
सुश्रियि सुश्रियोः सुश्रीषु ॥ तथैव सुधीशब्दः ।
ऊकारान्तः पुँल्लिङ्गः स्वयम्भूशब्दः । स्वयंभूः स्व-
यंभुवौ स्वयंभुवः । स्वयंभुवम् स्वयंभुवौ स्वयंभु-

---

१ का संख्या येषां ते कति च शब्दाश्च तेषां समाहारस्तस्मात् । २ ईच ऊच यू तयोर्य्वोः । ३ धात्ववयवेकारोकारयोरित्यर्थः ।

वः । स्वयंभुवा स्वयंभूभ्यां स्वयंभूभिः । स्वय
स्वयंभूभ्यां स्वयंभूभ्यः । स्वयंभुवः स्वयंभूभ्यां
यंभूभ्यः । स्वयंभुवः स्वयंभुवोः स्वयंभुवां ।
भुवि स्वयंभुवोः स्वयंभूषु ॥ ४६ ॥

सेनानीशब्दस्याविशेषो हसादौ । स्वरादौ तु
शेषः । सेनानी औ इति स्थिते ।

[य्वौ वा ४७]–धातोरवयवसंयोगपूर्वौ य
दीकाराद्ूकाराद्वास्ति तदन्तस्यानेकस्वरस्य ईका
ऊकारस्यच यकारवकारौ भवतः स्वरे परे । वर्षा
नर्भूव्यतिरिक्तभूशब्दसुधीशब्दौ वर्जयित्वा ।
हणादियं विवक्षा । सेनानीः सेनान्यौ सेना
हे सेनानीः हे सेनान्यौ हे सेनान्यः । सेनान्यं से
न्यौ सेनान्यः । सेनान्या सेनानीभ्यां सेनानीभि
सेनान्ये सेनानीभ्यां सेनानीभ्यः । सेना
सेनानीभ्यां सेनानीभ्यः । सेनान्यः सेनान्यो

❀ सेनान्यादीनां वामो नुट् वक्तव्यः ❀

नान्यां सेनानीनां ॥ ४७ ॥ ।

[आम्[1] ङेः ४८]–आबन्तादीबन्तान्नीशब्दा-
त्तरस्य ङेरामादेशो भवति । सेनान्यां सेनान्योः
नानीषु । वातप्रमी शब्दस्य भेदः[2] । वातप्रमी वात-
म्यौ वातप्रम्यः । हे वातप्रमीः हे वातप्रम्यौ हे वात-
म्यः । वातप्रमीं[3] वातप्रम्यौ वातप्रमीन् । वातप्रम्या
तप्रमीभ्यां वातप्रमीभिः । वातप्रम्ये वातप्रमीभ्यां
तप्रमीभ्यः। वातप्रम्यः वातप्रमीभ्यां वातप्रमीभ्यः।
तप्रम्यः वातप्रम्योः । आमि नुट् । वातप्रमीनां।
ौतु सवर्णदीर्घः। वातप्रमी वातप्रम्योः वातप्रमीषु।
वं ग्रामणीप्रभृतयः सेनानीवत् । ऊकारान्ताश्च
वलूप्रभृतयः ॥ ४८ ॥

१ अत्र नियश्चेत्यनुवर्त्य आबन्तादीबन्तान्नीशब्दादिति व्याख्येयम्
२ अत्रापि भेदः प्राक्रियाविशेषोऽवगन्तव्यः ।
३ तथाच कारिकामाहुः "अमि वातप्रमीमाहुः शशि वातप्रमीनिति।
ङौ तु वातप्रमीत्येतत् शेषं ग्रामणिवन्मतम्" ॥ १ ॥

ऋकारान्तः पुँल्लिङ्गः पितृशब्दः ।

[सेरा ४९]–ऋकारान्तात्परस्य सेरा भव
च डित् । डित्वाट्टेर्लोपः । पिता ॥ ४९ ॥

[पंचसु ५०]–ऋकारोऽर्भवति पञ्चसु
च डित् । हे पितः हे पितरौ हे पितरः । पितरं
पितॄन् । पित्रा पितृभ्यां पितृभिः । पित्रे पि
पितृभ्यः । पितुः पितृभ्यां पितृभ्यः ।
पित्रोः पितॄणाम् ॥ ५० ॥

[ङौ ५१]–ऋकारस्यार्भवति ङौ परे ।
रि पित्रोः पितृषु । एवं जामातृभ्रात्रादयः । नृश
ना नरौ नरः । नरं नरौ नॄन् । न्रा नृभ्यां नृभि
नृभ्यां नृभ्यः । नुः नृभ्यां नृभ्यः । नुः न्रोः ॥

[नुर्वा नामि दीर्घः ५२]–नृशब्दस्य नामि
वा दीर्घो भवति । नृणां नॄणां । नरि न्रोः नृ
नः हे नरौ हे नरः॥५२॥कर्तृशब्दस्य पंचसु वि

[स्तुएर् ५३]—सकारतृप्रत्ययसम्बन्धिन ऋका-
यार्भवति पंचसु परेषु। कर्तृ सि इति स्थिते। यदा-
शास्तद्धद्भवति । सेरा। डिश्वाट्टेर्लोपः। कर्ता कर्ता-
कर्तारः। हे कर्तः हे कर्तारौ हे कर्तारः । कर्तारं
र्तारौ कर्तॄन्। कर्त्रा कर्तृभ्यां कर्तृभिः। कर्त्रे
र्तृभ्यां कर्तृभ्यः। कर्तुः कर्तृभ्यां कर्तृभ्यः। कर्तुः
र्त्रोः कर्तॄणां। कर्तरि कर्त्रोः कर्तृषु। एवं नप्तृहो-
प्रशास्तृप्रभृतयः। उकारान्तस्य क्रोष्टुशब्दस्य भेदः
❀ उकारान्तस्यापि क्रोष्टुशब्दस्य पंचस्वाधिषु तृप्र-
त्ययान्तस्येव रूपं वक्तव्यम् ❀
क्रोष्टा क्रोष्टारौ क्रोष्टारः। क्रोष्टारं क्रोष्टारौ । श-
सि तृप्रत्ययान्तवद्भावाभावात् क्रोष्टून्।

❀ तृतीयादौस्वरादौ तृप्रत्ययान्तता वा वक्तव्या ❀
क्रोष्ट्रा क्रोष्टुना। क्रोष्टुभ्यां क्रोष्टुभिः। क्रोष्ट्रे क्रो-
ष्टवे क्रोष्टुभ्यां क्रोष्टुभ्यः। क्रोष्टुः क्रोष्टोः क्रोष्टुभ्यां

क्रोष्टुभ्यः । क्रोष्टुः क्रोष्टोः क्रोष्ट्रोः क्रोष्ट्वोः क्रोष्टूनां
डागमे कृते हसादित्वात्तृज्वद्भावो नास्ति । कृ
तप्रसंगो यो विधिः स नित्यः । नित्यानित्ययोः
नित्यविधिर्बलवान् । क्रोष्टरि क्रोष्टौ क्रोष्टोः क्रो
क्रोष्टुषु । ऋकारान्ता ऌकारान्ता एकारान्ताश्च
सिद्धाः[1] ॥ ५३ ॥

ऐकारान्तः पुँल्लिंगः सुरैशब्दः ।

[रैस्भि[2] ५४]—रैशब्दस्याकारादेशो भवति स
स्भकारादौ विभक्तौ परतः । सुराः । स्वरादौ सव
यादेशः । सुरायौ सुरायः । हे सुराः हे सुरायौ हे
रायः । सुरायं सुरायौ सुरायः । सुराया सुरा
सुराभिरित्यादि ॥ ५४ ॥

ओकारान्तः पुँल्लिंगो गोशब्दः ।

[ओरौ ५५]—ओकारस्यौकारादेशो भव

१ अप्रसिद्धत्वम् वेदपुराणादौ अविहितत्वात् तथात्र लेखाभावः ।
२ एतदविभक्तिको निर्देशः ।

सु परेषु । गौः गावौ गावः । हे गौः हे गावौ हे
वः ॥ ५५ ॥

[आम्शसि ५६]-ओकारस्यात्वं भवति अमि
सि च परे गां गावौ गाः । गवा गोभ्यां गोभिः ।
वे गोभ्यां गोभ्यः । ङसीत्यकारलोपः । गोः गोभ्यां
भ्यः । गोः गवोः गवां । गवि गवोः गोषु । एवं
द्योशब्दः ॥ ग्लौशब्दस्य हसादावविशेषः स्वरादा-
वादेशः ॥ ग्लौः[1] ग्लावौ ग्लावः । ग्लावं ग्लावौ
लावः । ग्लावा ग्लौभ्यामित्यादि ॥ ५६ ॥

॥ इति स्वरांताः पुंल्लिंगाः ॥

अथ स्वरान्ताः स्त्रीलिंगाः प्रदर्श्यन्ते ॥

तत्राबन्तो गंगाशब्दः ।

[आबतः स्त्रियाम् १]-आकारान्तान्नाम्नः स्त्रि-
यां वर्तमानादाप्प्रत्ययोभवति ।

---

१ "ग्लौःमृगांकः कलानिधिरित्यमरः"

[आप[1]: २]–आबन्तात्परस्य सेर्लोपो भव
गङ्गा ॥ २ ॥

[औ[2] ३]–आबन्तात्पर औ ईकारमापद्यते
इ ए। गंगे गंगाः।

[धि[3]रिः ४]–आबन्तात्परो धिरिर्भवति। हे गंगे।

[अम्बादीनां धौ ह्रस्वः ५]–आम्बादीनां
परे ह्रस्वो भवति। हे अम्ब हे अक्क हे अ
असंयुक्तानां डलकवतीनां प्रतिषेधो वाच्यः
हे अम्बाडे हे अम्बाले हे अम्बिके। इत्यादौ ह्र
न भवति। गंगां गंगे गंगाः ॥ ५ ॥

[टौसोरे ६]–आबन्तस्य टौसोः परयोरेत्वं भव
अयादेशः। गंगया गंगाभ्यां गंगाभिः ॥ ६ ॥

---

१ अत्र आ, आप इति छेदः कर्तव्यः तेन "अतिगंगः" इत्यादौ
तिप्रसंगः। २ धिरिरित्यत इ अनुवर्तनीयम्। ३ दीर्घविधानमौ इति सूत्रे
त्यर्थम् वस्तुतस्तु ह्रस्व एव युक्तः।

[ङितां यट् ७]–आबन्तात्परेषां ङे ङसि ङस् ङि इत्येतेषां यडागमो भवति। टकारः स्थाननियमार्थः। गङ्गायै गंगाभ्यां गंगाभ्यः। गंगायाः गंगाभ्यां गंगाभ्यः। गंगायाः गंगयोः। ❋ आबन्तादीबन्तादामो नुट् वक्तव्यः ❋ गंगानाम्। आम् ङेः गंगायां गंगयोः गंगासु। एवं श्रद्धामेधाशालामालाहेलादोलाप्रभृतयः। सर्वादीनां तु ङित्सु विशेषः॥ ७॥

[यटोऽच्च ८]–आबन्तात्सर्वादेः परस्य यटः स्युडागमो भवति पूर्वस्य चापोऽकारो भवति। सर्वस्यै सर्वाभ्यां सर्वाभ्यः। सर्वस्याः सर्वाभ्यां सर्वाभ्यः। सर्वस्याः सर्वयोः सर्वासां। सर्वस्यां सर्वयोः सर्वासु। आकारान्तो जराशब्दः। जरायाः स्वरादौ जरस् वा वक्तव्यः॥

१ स्थानस्य नियमोवश्यंभावः सोऽर्थो यस्यासौ साति हि टकारे टित्कितावाद्यन्तयोरित्यागमिनः। आदिरेवायमागमो भवति इत्येवं देशोनियम्यत इत्यर्थः। २ अनेन आबन्तात् ङेरामादेश इति शेषः।

जरा जरसौ जरे जरसः जराः । जरसं जरां जर
जरे जरसः जराः । जरसा जरया जराभ्यां जराभि
जरसे जरायै जराभ्यां जराभ्यः । जरसः जराय
जराभ्यां जराभ्यः । जरसः जरायाः जरसोः जरये
जरसां जराणां । जरसि जरायां जरसोः जरयोः जर
सु । हे जरे हे जरसौ हे जरे हे जरसः हे जराः । इ
कारान्तः स्त्रीलिंगो बुद्धिशब्दः । तस्य च प्रथमाद्वि
तीययोः हरिशब्दवत् प्रक्रिया । बुद्धिः बुद्धी बुद्धयः
बुद्धिं बुद्धी बुद्धीः स्त्रीत्वाच्छसो नत्वाभावः । बुद्ध्या
बुद्धिभ्यां बुद्धिभिः ॥ ८ ॥

[इदुद्भ्याम् १]—स्त्रियां वर्तमानाभ्यामिकारोका
राभ्यां परेषां ङिता वचनानां वा अडागमो भवति।
बुद्धयै बुद्धये बुद्धिभ्यां बुद्धिभ्यः। बुद्ध्याः बुद्धेः बुद्धि-
भ्यां बुद्धिभ्यः। बुद्ध्याः बुद्धेः बुद्ध्योः बुद्धीनाम् १

---

१ इदुन्मात्रस्य स्त्रियामप्रवृत्तेर्ङितामसंभवाच्च तदन्ताभ्यामित्यर्थः

[स्त्रियांयोः १०]–इश्च उश्च यू तस्मात् इवर्णान्ता-द्वुवर्णान्ताच्च परस्य ङेरामादेशो भवति । बुद्धयां । अडागमाभावे आमोऽप्यभावः । बुद्धौ बुद्धयोः बुद्धिषु । एवं मतिभूतिविभूतिधृतिरुचिकृतिसिद्धिशान्तिक्षान्तिभ्रांत्यालिशक्तिप्रभृतयः । एवं धेनुतनुरज्जु प्रभृतयः स्त्रीलिंगाः । धेनुः धेनू धेनवः । धेनुं धेनू धेनूः । धेन्वा धेनुभ्यां धेनुभिः । धेन्वै धेनवे धेनुभ्यां धेनुभ्यः । धेन्वाः धेनोः धेनुभ्यां धेनुभ्यः । धेन्वाः धेनोः धेन्वोः धेनूनां । धेन्वां धेनौ धेन्वोः धेनुषु ॥ १० ॥

ईकारान्तः स्त्रीलिंगो नदीशब्दः ।

[हसेपस्सेर्लोपः ११]–हसन्तादीबन्ताच्च परस्य सेर्लोपो भवति । नदी नद्यौ नद्यः ॥ ११ ॥

---

१ द्वंद्वैकत्वेन निर्देशः सूत्रे तु छांदसं पुंस्त्वम् ।

२ अत्र हसेपमात्रग्रहणात् सिर्न भवति इति सामर्थ्यात्तदन्तग्रहणमित्याह ॥ हसान्तादीबंताच्चेति ।

[घौ ह्रस्वः १२]—इवर्णोवर्णयोरधातोः स्त्रि
धौ परे ह्रस्वो भवति । हे नदि हे नद्यौ हे नद्यः ।
दीम् नद्यौ नदीः । नद्या नदीभ्यां नदीभिः ॥१२
[ङितामट् १३]—स्त्रियामीकारान्तादूकारान्ता
परेषांङितां वचनानामडागमो भवति॥नद्यै नदीभ्
नदीभ्यः । नद्याः नदीभ्यां नदीभ्यः । नद्याः नद्यो
नदीनां । नद्यां नद्योः नदीषु । एवं गौरीसरस्वती
ह्माणीकुमारीकिशोरीकलभीपार्वतीभवानीप्रभृतय
लक्ष्मीशब्दस्येबन्तत्वाभावात् सेर्लोपो नास्ति
लक्ष्मीः लक्ष्म्यौ लक्ष्म्यः । शेषं नदीवत् । हे लक्ष्मि
स्त्रीशब्दस्य ईबन्तत्वात्सेर्लोपोऽस्ति । स्त्री ॥ १३ ॥
[स्त्रीभ्रुवोः १४]—स्त्रीशब्दस्य भ्रूशब्दस्य च इयुवौ
भवतःस्वरे परे । स्त्रियौ स्त्रियः । हे स्त्रियौ हेस्त्रियः
[वाम् शसि १५]—स्त्रीशब्दस्य आमि शसि च

१ य्वोर्धातोरियुवौ स्वरे इत्यत्रधातोर्ग्रहणात् अत्र तदभावात् नूतन-
सूत्रारंभः । २ आमि शसि च परे स्त्रीशब्दस्य वा इयादेशो वक्तव्य इत्यर्थः ।
इदं वार्तिकं लेखकैर्भ्रमात्सूत्ररीत्यालिखितम् ।

परे वा इयादेशो भवति। स्त्रियं स्त्रीं स्त्रियौ स्त्रीः स्त्रियः। स्त्रिया स्त्रीभ्यां स्त्रीभिः । स्त्रीषु। शेषं नदीवत्। श्रीः श्रियौ श्रियः। श्रियं श्रियौ श्रियः। श्रिया श्रीभ्यां श्रीभिः ॥ १५ ॥

[वेयुवः १६]—इयुवन्तात् स्त्रियां वर्तमानांत ङितां वचनानां वाडागमो भवति स्त्रियास्तु नित्यम्[1] श्रियै श्रिये श्रीभ्यां श्रिभ्यः। श्रियः श्रियाः श्रीभ्यां श्रीभ्यः। श्रियः श्रियाः श्रियोः।

❀ श्रियादीनांवामो नुट् वक्तव्यः[2] ❀

श्रियां श्रीणां। ङौ परेऽडागमाभावे आमोप्यभावः। श्रियां श्रियि श्रियोः श्रीषु। हे श्रीः। एवं ह्रीधी-प्रभृतयोऽप्यनीबन्ताः। एवं भूशब्दो भ्रूशब्दवत् वधू-जम्ब्वादीनां नदीशब्दवत्। वधूः वध्वौ वध्वः। वधूं वध्वौ वधूः। जम्बूः जम्ब्वौ जम्ब्वः। हे जम्बु हे ज-

१. नित्यस्त्रीत्ववृत्तेरित्यर्थः। २ श्रीप्रकाराणां नित्यस्त्रीत्वानासंबंधिन आमोवा नुट् स्यादिति वक्तव्यार्थः।

म्ब्वौ हे जम्ब्वः । ऋकारन्तो मातृशब्दः । माता
तरौ मातरः । मातरं मातरौ मातॄः । शसीतिदीर्घ
म् । शेषं पितृवत् । रैशब्दः सुरैशब्दवत् । नौश
ग्लौशब्दवत् । गोशब्दस्तु पूर्ववत् ॥ १६ ॥

इति स्वरांताः स्त्रीलिंगाः ॥

[अथ स्वरान्ता नपुंसकलिंगाःप्रदर्श्यन्ते]—अ
रान्तो नपुंसकः कुलशब्दः । तस्य प्रथमाद्वितीयै
वचने ।

[अतोऽम् १]—अकारान्तान्नपुंसकलिंगात्परय
स्यमोरम् भवति अधौ । अमोऽम् ग्रहणं लुग्व्या
च्यर्थं । अम्शसोरस्य । कुलं ॥ १ ॥

[ईमौ २] नपुंसकलिंगात्पर औ ईकारमापद्यते
कुले ॥ २ ॥

[जश्शसोः शिः ३]—नपुंसकलिंगात्परयोर्जस्शस्

१ अप्रश्लिष्टेपि निर्देशे अमेवादेशो नमकारमात्रं तथा सति लाघ
वासंदेहार्थमत इति निर्देश्यं स्यादत आह स्यमोरिति ।

तः शिर्भवति । शकारः सर्वादेशार्थः ॥ ३ ॥

❀ गुरुः शिश्च सर्वस्य वक्तव्यः ❀

[नुमयमः ४]—नपुंसकस्य नुमागमो भवति शौ परे यमग्रत्याहारान्तस्य न भवति ॥ ४ ॥

❀ मिदन्त्यात् स्वरात् परो वक्तव्यः ❀

[नोपधायाः ५]—नान्तस्योपधाया दीर्घो भवति शौ परे धिवर्जितेषु पञ्चसु नामि च नत्वीति । कुलानि । हे कुल हे कुले हे कुलानि । पुनरपि । कुलं कुले कुलानि । शेषं देववत् । एवं मूलफलपत्रपुष्प-कुटुम्बादयः ॥ ५ ॥

[श्त्वन्यादेः ६]—अन्यादेर्गणात् परयोः स्यमोः श्तु-र्भवति शकारः शित्कार्यार्थः । उकार उच्चारणार्थः ।६।

[वावसाने ७]—अवसाने वर्त्तमानानां झसानां जबा

१ अत्रनकारामात्रस्योपधा न संभवतीति सामर्थ्यात्तदन्तग्रहणमित्याह नान्तस्येति । २ अदिशेषात् द्वितीयापि प्रथमावत् इत्यर्थः । ३ आदिशब्दस्य प्रकारार्थत्वान्मूलादिप्रकाराः क्लीबार्थाः कुलवत्साध्या इत्यर्थः ।

भवन्ति चपा वा । अन्यत् अन्यद् अन्ये अन्यानि पुनरपि । अन्यत् अन्यद् अन्ये अन्यानि । अन्यतरत् अन्यतरद् अन्यतरे अन्यतराणि ॥ २ ॥ इतरत् इतरद् इतरे इतराणि ॥ २ ॥ कतरत् कतरद् कतरे कतराणि ॥ २ ॥ कतमत् कतमद् कतमे कतमानि ॥ २ ॥ शेषं सर्वशब्दवत् ॥ एते चान्यादयः ॥ ७ ॥

इकारान्तोऽस्थिशब्दः ।

[नपुंसकात् स्यमोर्लुक् ८]–नपुंसकलिंगात् परयोः स्यमोर्लुग् भवति । अस्थि ॥ ८ ॥

[य्वृणाम् ९]–इश्च उश्च ऋश्च य्वः तेषां य्वृणां[1] ❀ नपुंसके धौ वा गुणो वक्तव्यः ❀ हे अस्थि हे अस्थे हे अस्थिनी हे अस्थीनि ॥ ९ ॥

उक्तं हि ।

सम्बोधने[3] तूँ[4]शनसास्त्रिरूपं[2] सान्तं[1] तथा[6] नान्तमथाप्य-

[1] इ उ ऋ वर्णान्तानां क्लीबे धिविषये वा गुणः ए ओ आरिति स्यादीति वक्तव्यार्थः ।

र्दन्तं। माध्यंन्दिनिर्वष्टि ¹⁰ गुणं त्विगंते ¹¹ नपुंसके व्याघ्रपदां वरिष्ठः ॥ ९ ॥

[नामिनःस्वरे १०]—नाम्यन्तस्य नपुंसकलिंगस्य नुमागमो भवति स्वरे परे। ईमौ॥ अस्थिनी॥१०॥

[अच्चास्थ्नां शसादौ ११]—अस्थ्यादीनां नुमागमो भवति ईकारस्य चाकारो भवति शसादौ स्वरे परे ॥ ११ ॥

[अल्लोपःस्वरे अम्बयुक्ताच्छसादौ १२]—नान्तस्योपधाया अकारस्य लोपो भवति शसादौ स्वरे परे मकारवकारान्तसंयोगादुत्तरस्य न भवति। अस्थ्ना अस्थिभ्यां अस्थिभिः। अस्थ्ने अस्थिभ्यां अस्थिभ्यः। अस्थ्नः अस्थ्नोः अस्थ्नां ॥ १२ ॥

[वेङ्योः १३]—ईङ्योः परयोर्वा अकारस्य लोपो भवति। अस्थ्नि अस्थनि। एवं दधिसक्थि-

---

१ अत्रस्याद्यधिकाराद्दध्यत्रेत्यादौ पदान्तरस्थे स्वरे नुम् न।

अक्षिशब्दाः । दध्ना दधिभ्यां दधिभिः । सक्थि सक्थिनी सक्थीनि ॥ २ ॥ सक्थ्ना सक्थिभ्यां सक्थिभिः । अक्ष्णा अक्षिभ्यां अक्षिभिः । इति पूर्ववत् प्रक्रिया ॥ १३ ॥

[नपुंसकस्य ह्रस्वः १४]—नपुंसकस्य ह्रस्वो भवति । नपुंसकात् स्यमोर्लुक् ॥ ग्रामणि । नामिनः स्वरे । ईमौ । ग्रामणिनी ग्रामणीनि । नामिनः स्वरे । नोपधायाः इति दीर्घः ॥ १४ ॥

[टादावुक्तपुंस्कं पुंवद्वा १५]—उक्तपुंस्कं नाम्यन्तं नपुंसकलिंगं टादौ स्वरे परे पुंवद्वा भवति । नामिनः स्वरे । ग्रामणिना ग्रामण्या ग्रामणिभ्यां ग्रामणिभिः । ग्रामण्ये ग्रामणिने ग्रामणिभ्यां ग्रामणिभ्यः । ग्रामण्यः ग्रामणिनः ग्रामण्योः ग्रामणिनोः ग्रामण्यां । नुमन्तस्यामि दीर्घो नामिनः स्वरे । ग्रामणीनां । आम् ङेः । ग्रामण्यां । ग्रामणिनि ग्रामण्योः ग्रामणिनोः ग्रामणिषु । हे ग्रामणि । हे ग्राम-

णिनी हे ग्रामणीनि । अतोम् । सोमपं सोमपे सोमपानि ॥ २ ॥

सोमपेन सोमपाभ्यां सोमपैः । सोमपाय सोमपाभ्यां सोमपेभ्यः । इति पूर्ववत् ॥

उकारान्तो मधुशब्दः । नपुंसकात्स्यमोर्लुक् । मधु । नामिनः स्वरे इति नुमागमः मधुनी । जश्शसोः शिः । नोपधायाः इति दीर्घः । मधूनि । पुनरपि । मधु मधुनी मधूनि । नामिनः स्वरे । मधुना मधुभ्यां मधुभिः । ऋकारान्तः कर्तृशब्दः । नपुंसकात् स्यमोर्लुक् । कर्तृ । नामिनः स्वरे । षुर्नोणोऽनन्ते । कर्तृणी कर्तॄणि ॥ २ ॥ ऋरं । कर्त्रा कर्तृणा कर्तृभ्यां कर्तृभिः । कर्त्रे कर्तृणे कर्तृभ्यां कर्तृभ्यः । ऋतोङ उः । स च डित् । डिति टेः । कर्तुः कर्तृणः कर्तृभ्यां कर्तृभ्यः । कर्तुः कर्तृणः कर्त्रोः कर्तृणोः कर्तॄणां । कर्तरि कर्तृणि कर्त्रोः कर्तृणोः कर्तृषु । हे कर्तृ कर्तृणी हे कर्तॄणि । ऐकारान्तः अतिरैशब्दः रायमति-

क्रान्तमतिरि कुलं। नावमतिक्रान्तमतिनु जलं। उकारान्त उपगुशब्दः। उपगता गावो यस्येति तदुपगुः ॥ १५ ॥

॥ इति स्वरान्ता नपुंसकलिङ्गाः ॥

अथ हसान्ताः पुँल्लिंगाः प्रदर्श्यन्ते।

तत्र हकारान्तः पुँल्लिंगो अनडुहूशब्दः। नामसंज्ञायां स्यादयः।

❋ पंचस्वनडुह आमागमो वक्तव्यः[1] ❋

[सावनडुहः १]—अनडुहूशब्दस्य सौ परे नुमागमो भवति ॥ १ ॥

[संयोगान्तस्य लोपः २]—संयोगान्तस्य लोपो भवति रसे पदान्ते च। रेफादुत्तरस्य सकारस्यैव लोपो नान्यस्य ॥ २ ॥

[हसेपःसेर्लोपः ३]—हसान्तादीबंताच्च परस्य

१ "अनडुहश्च" इत्यतोऽनडुह इत्यनुकृष्य "पंचसु" इत्यतः पंचसु तथा चानडुहशब्दस्य पंचसु वचनेषु परेषु आडागमः स्यादिति वक्तव्यार्थः।

सेर्लोपो भवति । उवं इति वत्वं । लोप[1]विधिसामर्थ्या-न्न दत्वम् । अनड्वान् अनड्वाहौ अनड्वाहः । अनड्वा-हं अनड्वाहौ अनडुहः । अनडुहा अनडुद्भ्यां अन-डुद्भिः ॥ ३ ॥

[वसां रसे ४]—वसु स्रंसु ध्वंसु भ्रंसु अनडुह् इत्येतेषां रसे पदान्ते च दत्वं भवति । अनडुहे अन-डुद्भ्यां अनडुद्भ्यः । अनडुहः अनडुद्भ्याम् अन-डुद्भ्यः । अनडुहः अनडुहोः अनडुहां । अनडुहि अनडुहोः । खसे चपा झसानाम् । अनडुत्सु ॥ ४ ॥

[धावम् ५]—अनडुह्शब्दस्य धौ परे अमाग-मो भवति । सावनडुहः । उवं । स्वरहीनं परेण संयो-ज्यं । हे अनड्वन् हे अनड्वाहौ हे अनड्वाहः । इत्या-दि । गोदुह् शब्दस्य भेदः[2] ॥ ५ ॥

---

१ सर्वविधिभ्यो लोपविधिर्बलवानिति न्यायस्य जागरूकत्वाद्दत्वाभाव इति राद्धान्तः । २ भेदः प्रक्रियाविशेषोवेद्यः ।

[दादेर्घः ६] दादेर्धातोर्हकारस्य घत्वं भवति धातो झसेपरे नाम्नश्चरसे पदान्ते च। गोदुघ् सि इति स्थिते।

[आदिजबानाँ झसान्तस्य झभास्स्ध्वोः ७]-धातोर्झसान्तस्यादौ वर्त्तमानानाँ जबानाँ झभा भवन्ति सकारे ध्वशब्दे च परे नाम्नश्च रसे पदान्ते च॥७॥

[वावसाने ८]-अवसाने वर्त्तमानानां झसानां जबा भवन्ति चपा वा। गोधुक् गोधुग् गोदुहौ गोदुहः। गोदुहं गोदुहौ गोदुहः। गोदुहा। भकारादौ दादेर्घइति घत्वे आदिजबस्य दकारस्य झभे धकारे च कृते झबे जबाः। गोधुग्भ्यां गोधुग्भिः। खसे चपा झसानां। किलात् षः सः कृतस्येति षत्वं। क्षसंयोगे क्षः। गोधुक्षु। हे गोधुक् हे गोधुग् हे गोदुहौ हे गोदुहः॥ ८॥

मधुलिह्शब्दस्य विशेषः।

---

१ द आदिर्यस्य स दादिः तस्य दादेर्नाम्नश्चेतो नाम्नश्चेति पदान्ते चेत्यतः पदान्ते इति उपादेयम् तथा तदर्थः कर्तव्यः।

[हो ढः ९]—धातोर्हकारस्य ढत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च । वावसाने । मधुलिट्[1] मधुलिड् मधुलिहौ मधुलिहः । हे मधुलिट् हे मधुलिड् हे मधुलिहौ हे मधुलिहः। मधुलिहं मधुलिहौ मधुलिहः । मधुलिहा मधुलिड्भ्यां मधुलिड्भिः ॥ ९ ॥

तुरासाहृशब्दस्य भेदः ।

[सहेः षः साढि १०]—साढि रूपे सति सहेर्धातोस्सकारस्य[2] षकारादेशो भवति । तुराषाड्[3] इत्यादि ॥ १० ॥

[द्रुहादीनां[4] घत्वढत्वे वा ११]—द्रुहादीनां धातूनां घत्वढत्वे वा भवतः रसे पदान्ते च । मित्रध्रुक्[5] मित्रध्रुग् मित्रध्रुट् मित्रध्रुड् मित्रद्रुहौ मित्रद्रुहः । मित्रद्रुहं मित्रद्रुहौ मित्रद्रुहः । मित्रद्रुहा । झबे जबाः ।

---

१ मधु लेढीति मधुलिट् भ्रमरः । २ एतच्च छ ष स इति सूत्रादनुवर्तनीयम् । ३ "तुराषाण्मेघवाहन" इत्यमरः । ४ "द्रुहादेर्वा" इति सूत्राल्लब्धमतोवार्तिकत्वमेतस्य अतएव व्यक्तवक्तव्यान्तोर्थः कार्य्यः । ५ मित्राणि द्रुह्यतीति मित्रध्रुक् ।

मित्रध्रुग्भ्यां मित्रध्रुड्भ्यां इत्यादि । एवं तत्त्वमुह्स्नुह्शब्दौ ॥ ११ ॥

रेफान्तश्चतुर्शब्दो नित्यं बहुवचनान्तः ॥

[चतुरा[१]म् शौच १२]–चतुर्शब्दस्यामागमो भवति पञ्चसु परेषु शौ च । चत्वारः चतुरः चतुर्भिः चतुर्भ्यः ॥ १२ ॥

[रः संख्यायाः १३]–रेफान्तसंख्यायाः परस्यामो नुडागमो भवति । णत्वं द्वित्वं । चतुर्णां चतुर्षु ॥१३॥

नकारान्तोराजन्शब्दः । नोपधाया इति पंचसुदीर्घः

[नाम्नोनोलोपशधौ १४]–नाम्नो नकारस्यानागमजस्य लोपश्च भवति रसेपदान्ते चाधौ । राजा राजानौ राजानः । राजानं राजानौ । अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ । स्तोश्चुभिः श्चुरिति चुत्वेन ञकारः ॥ १४ ॥

---

१ चतुरिति लुतषष्ठीकं पदं अत्र इतोत्पंचसु इतोनुवर्तमानं पंचस्विति चकारेण समुच्चीयते इत्याद पंचस्वित्यादिना ।

[जञोर्ज्ञः १५]—जकारञकारयोर्योगे ज्ञो भवति । राज्ञा । राज्ञे राजभ्यां राजभ्यः । वेङ्योः । राज्ञि राजनि राज्ञोः राजसु इत्यादि । एवं यज्वन् आत्मन् सुधर्मन् प्रभृतयः । अम्वयुक्तादिति[1] विशेषणादल्लोपो नास्ति । यज्वनः यज्वना इत्यादि । श्वन् युवन् मघवन् शब्दानां पंचसु राजन्शब्दवत् प्रक्रिया शसादौ तु विशेषः ॥ १५ ॥

[श्वादेर्व उः[2] १६]—श्वादेर्वकारस्य उत्वं भवति शसादौ स्वरे परे तद्धिते ईपि ईकारे च। शुनः। शुना श्वभ्यां श्वभिरित्यादि ॥ युवन्शब्दस्य वकारस्योत्वे कृते । सवर्णे दीर्घः सह। यूनः । यूना युवभ्यां युवभिरित्यादि । पथिन्शब्दस्य भेदः॥१६॥

[इतोत्पंचसु १७]—पथ्यादीनामिकारस्याकारादेशो[3] भवति पञ्चसुपरेषु ॥ १७ ॥

---

१ मकारवकारसंयुक्ताक्षरं वर्जयित्वेत्यर्थः। २ अत्रवसोर्व उमित्यतोवउम् अल्लोपः स्वरे इत्यतः शसादौ वादी पोरित्यतः ईकारः ईव्यपि इति मत्वाच वकारस्योति । ३ पथिमाथिऋभुक्षामित्यर्थः ।

[थोनुट् १८]—पथ्यादीनां थकारस्य नुडाग मो भवति पञ्चसु स्यादिषु परेषु । पन्थन् सि इति स्थिते ॥ १८ ॥

[आसौ १९]—पथ्यादीनां टेरात्वं भवति सौ परे । पन्थाः पन्थानौ पन्थानः । आत्वविधाना सेर्लोपः । हे पन्थाः । पन्थानं पन्थानौ ॥ १९ ॥

[पथां टेः २०]—पन्थादीनां टेर्लोपो भवति शसादौ स्वरे परे ।

पथा पथिभ्यां पथिभिरित्यादि । एवं मथिन् ऋ भुक्षिन्शब्दौ । दण्डिन्शब्दस्य भेदः ॥ २० ॥

[इनां शौ सौ २१]—इन् हन् पूषन् अर्यमन् इत्येतेषां

---

१ आतोधातोर्लोप इत्यतो लोप इत्यनुवर्तते अन्यथानुपपत्त्या पथामिति बहुवचनेन जिघृक्षतावेतावुपात्तौ पथिवत्स्यातामित्यर्थः ।

२ ननु सर्वे एते नान्ता अतो नोपधाया इत्यनेनैव सिद्धो दीर्घः अतो नियमार्थ एतत्सूत्रारम्भः । एतेषामत्रैव दीर्घो नान्यत्र तेन दण्डिनौ पूषणौ इत्यादौ न दीर्घः विभक्तिनिमित्तस्योपधालक्षणस्य च नियमेन व्यावर्त्य-त्वात् पूषायत इति ये दीर्घो भवत्येव सिद्धेसत्यारम्भो नियमायेति अभियु-क्तोक्तेर्जागरूकत्वात् ।

शौ सौ चाधौ परे उपधाया दीर्घो भवति। दण्डी दण्डिनौ दण्डिनः। हे दण्डिन्। दंडिनं दंडिनौ दंडिनः। दंडिना दंडिभ्यां दंडिभिः। इत्यादि। ब्रह्महा ब्रह्महणौ ब्रह्महणः। हे ब्रह्महन् हे ब्रह्महणौ हे ब्रह्महणः। ब्रह्महणं ब्रह्महणौ। शसादौ अकारलोपः॥ २१॥

[हन्तेर्घ्ने २२] हन्तेर्धातोर्हकारस्य घकारो भवति नकारे ञ्णिति च परे। घसंयोगो णत्वनिषेधार्थः। ब्रह्मघ्नः ब्रह्मघ्ना ब्रह्महभ्यां ब्रह्महभिः इत्यादि। पूषा पूषणौ पूषणः। हे पूषन् हे पूषणौ हे पूषणः। पूषणं पूषणौ॥ २२॥

[षणोः ष्णः २३]—षकारणकारसंयोगे ष्णो भवति शसादौ स्वरे परे। पूषन्शब्दस्य शसादौ स्वरे परे वा टेर्लोपः। पूष्णः। पूष्णा पूषभ्यां पूषभिः। पूष्णे। ङौ टिलोपो वेति केचित्। पूष्णि पूषणि पूषि पूष्णोः पूषसु। अर्य्यम्णः। अर्य्यम्णा अर्य्यमभ्यां इत्यादि। संख्या[3]शब्दाः पञ्चन्[1]प्रभृतयो बहु

वचनान्तास्त्रिषु सरूपाः । पञ्चन् जस् इ
स्थिते ॥ २३ ॥

[जश्शसोर्लुक् २४]—षकारनकारान्तसंख्या
याः परयोर्जश्शसोर्लुक् भवति । प्रत्ययलोपे प्रत्ययल
क्षणं । लुकि न तन्निमित्तं । पंच । पंच । पञ्चभिः
पंचभ्यः २ ॥ २४ ॥

[षणः २५]—षकारनकारान्तसंख्यायाः पर
स्यामो नुडागमो भवति । नोपधाया इति दीर्घः
नाम्नोनो लोपशधौ । पंचानां पंचसु । एवं सप्तन् न
वन् दशन् प्रभृतयः ॥ २५ ॥

[अष्टनो डौ वा २६]—अष्टन्शब्दात् परयोर्ज
श्शसोर्वा डौ भवति । डित्वाट्टिलोपः । अष्टौ अष्ट
अष्टौ अष्ट ॥ २६ ॥

[वासु २७]—वाआ आसु अष्टन आसु परा
सु विभक्तिषु वा आत्वं भवति । अष्टाभिः अष्टभिः

१ लुकिसतितन्निमित्तकार्य्यं न भवति इति वक्तव्यार्थः ।

अष्टभ्यः अष्टाभ्यः २। अष्टानां। अष्टसु अष्टासु २७

मकारान्त इदम्[1]शब्दः।

[इदमोयं पुंसि २८]–इदम्शब्दस्य पुंसि विषये अयमादेशो भवति सिसहितस्य। अयं द्विवचनादौ त्यदादेष्टेरः स्यादावित्यकारः। इद औ इति स्थिते॥ २८॥

[दस्य मः २९]–त्यदादीनां दकारस्य मत्वं भवति स्यादौ परे। इमौ इमे। सर्वादित्वाज्जसी। यदादीनां घेरभावः। इमं इमौ इमान्॥ २९॥

[अन् टौसोः ३०]–इदमोऽनादेशो भवति। टौसोः परयोः। अनेन॥ ३०॥

[स्भ्यः ३१]–इदमः सकारे भकारे च परे अकारो भवति। कृत्स्नस्य अद्धीत्यात्वं। आभ्यां॥३१॥

[भिसूभिस् ३२]–इदमदसोर्भिस् भिं[2] सेव भव-

---

१ "इदमस्तु सन्निकृष्टे समीपतरवर्तिचैतदो रूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्" इत्येतच्छब्दार्थबोधिका कारिकात्रानुसंधेया।

२ भिसो भिस्विधानं भ्य इति बाधनार्थं।

ति। न भकारस्याकारः। एस्भि बहुत्वे। एभिः। अस्मै आभ्यां एभ्यः। अस्मात् आभ्यां एभ्यः। अस्य अनयोः एषां। अस्मिन् अनयोः एषु। किमृशब्दस्य त्यदादेष्टेरः स्यादाविति सर्वत्राकारे कृते सर्वशब्दवद्रूपम्। कः कौ के कं कौ कान्। इत्यादि। धकारान्तस्तत्वबुध् शब्दः तस्य रसे पदान्ते चादिजबानामिति भकारः। वावसाने। तत्वभुत् तत्वभुद् तत्वबुधौ तत्वबुधः। हे तत्वभुत् हे तत्वभुद्। तत्वबुधं तत्वबुधौ तत्वबुधः। तत्वबुधा तत्वभुद्भ्यां तत्वभुद्भिः। इत्यादि ॥३२॥

जकारान्तः सम्राज् शब्दः।

[छशषराजादेः षः३३]—छकारान्तस्य शकारान्तस्य षकारान्तस्य च राज् यज् सृज् भ्राजादेश्च षकारो भवति। धातोर्झसे परे नाम्नश्च रसे पदान्ते च॥३३॥

---

१ षकारान्तेषु पुनः षत्वविधानमाख्यातोच्चीरते "द्वेष्टि" इत्यादौ षत्वमेव यथास्यात् डत्वंमाभूत् इत्येतदर्थम्।

[षो डः ३४]—षकारस्य डत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च। वावसाने टकारः डकारश्च। सम्राट् सम्राड् सम्राजौ सम्राजः। सम्राजं सम्राजौ सम्राजः। सम्राजा सम्राड्भ्यां सम्राड्भिः इत्यादि। एवं विराजादयः। दकारान्तास्त्यद् तद् यद् एतद् शब्दास्तेषां त्यदादेष्टेरः स्यादाविति सर्वत्राकारे कृते सर्वशब्दवद्रूपं ज्ञेयम्॥ ३४॥

[स्तः ३५]—त्यदादेस्तकारस्य सौ परे सत्वं भवति। स्यः त्यौ त्ये। त्यं त्यौ त्यान्। सः तौ ते। तं तौ तान्। यः यौ ये। यं यौ यान्। एषः एतौ एते। ❋एतदोऽन्वादेशे द्वितीयाटौस्स्वेनो वा वक्तव्यः❋ उक्तस्य पुनरुक्तमन्वादेशः। यथानेन बालेन व्याकरणमधीतं एनं छन्दोऽध्यापय। एतं एनं एतौ एनौ एतान् एनान्। एतेन एनेन एताभ्यां एतैः। एतयोः एनयोःएतेषां। एतस्मिन् एतयोः एनयोःएते-

षु । छकारान्तस्तत्त्वप्राछ्शब्दः। तत्त्वप्राट् तत्त्वंप्राड् तत्त्वप्राछौ तत्त्वप्राछः । इत्यादि ॥ ३५ ॥

[नोलोपः ३६]–धातोर्हसान्तस्योपधाभूतस्य नकारस्य लोपो भवति। ❋अंञ्चेःपञ्चसु नुम् वक्तव्यः❋ प्रत्यन् च् इति स्थिते । स्तोः श्चुभिश्चुरिति चुत्वेनात्र ञकारः । संयोगान्तस्य लोपः ॥ ३६ ॥

[चोः कुः ३७]–चवर्गस्य कवर्गादेशो भवति धातोर्झसे परे नाम्नश्चरसे पदान्ते च । यथासंख्येन। प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः । प्रत्यञ्चं प्रत्यञ्चौ ॥३७॥

[अचेर्दीर्घश्च ३८]–अञ्चेर्धातोरकारस्य लोपो वभति पूर्वस्य च दीर्घः शसादौ स्वरे तद्धिते ईपीकारे च । निमित्ताभावे नैमित्तिकस्याप्यभावः । प्रतीचः । प्रतीचा प्रत्यग्भ्यां प्रत्यग्भिः । प्रत्यक्षु ।

---

१ तत्वं पृच्छति इति तत्वप्राट् क्विबपि तस्य सर्वापहारिलोपः ।
२ व्रितोनुम् इत्यतः परं अचेश्चेति सूत्रमस्ति तस्यायमर्थः अंचेः पंचसु नुमागमो भवति एतदाचार्य्यैर्लाघवार्थं इत्थं व्याख्यातम् । ३ अत्र अचेरिति लुप्तनकारात्मधातिनिर्देशः यत्रास्य नलोपः तत्रैव यथा स्यादिति ज्ञापनार्थः

एवं तिर्य्यच्प्रभृतयः। तिर्य्यङ् तिर्य्यञ्चौ तिर्य्यञ्चः। तिर्य्यञ्चं तिर्य्यञ्चौ ॥ ३८ ॥

[तिरश्चादयः ३९]—तिरश्चादयो निपात्यन्ते शसादौ स्वरे परे तद्धिते ईपि ईकारे च। तिरश्चः। तिरश्चा तिर्य्यग्भ्यां तिर्य्यग्भिः। तिर्य्यक्षु। उदच् शब्दस्य उदीच इति निपात्यते शसादौ स्वरे परे। उदीचः। उदीचा इत्यादि। एवमग्निचित् ॥ ३९ ॥

तकारान्त उकारानुबन्धो महच्छब्दः।

[त्रितो[1]नुम् ४०]—उकारानुबन्धस्य ऋकारानुबन्धस्य च नुमागमो भवति पुंसि पञ्चसु परेषु ॥ ४० ॥

[न्संमहतोऽधौ दीर्घः शौच ४१]—न्सन्तस्याप् शब्दस्य महच्छब्दस्य च उपधाया दीर्घो भवति पञ्चसु धिवर्जितेषु शौ च परे। म[2]हान् महान्तौ म-

---

१ उश्च आ च त्रौ तावितौ यस्येति द्वंद्वान्ते श्रूयमाणइच्छब्दः प्रत्येकमभिसंबध्यते इत्यत आह उकारानुबन्धस्येति। २ महत्सीत्यत्र उगित्वान्नुमि दीर्घे हसेप इति सिलोपे संयोगान्तत्वात्तलोपे च एवं स्यात्।

हान्तः । महान्तं महान्तौ महतः । महता महद्भ्यां महद्भिः । हेमहन् इत्यादि ॥ ४१ ॥

उकारानुबन्धो भवत्शब्दः।

[अत्वसोः सौ ४२]—अत्वन्तस्यासंतस्य च दीर्घो भवति धिवर्जितेषु शौ च परे । भवान् भवन्तौ भवन्तः इत्यादि ॥ ऋकारानुबन्धस्य भवच्छब्दस्य नुमागम एव न दीर्घः । भवन् भवंतौ भवंत इत्यादि । पठन् पठन्तौ पठन्तः । पठन्तं पठंतौ । पचन् पचन्तौ पचन्तः । इत्यादि ।

शकारान्तो विश् शब्दः । छशषराजादिना षत्वं षोडः षकारस्य डत्वं च । वावसाने चपा जबाश्च । विट् विड् विशौ विशः ।

षकारन्तः षष्शब्दो नित्यं बहुवचनान्तस्त्रिषु सरूपः । जश्शसोर्लुक् । षोडः । षट् षड् । षड्भिः । षड्भ्यः २ ॥ ष्ण इति नुडागमः । षड् नाम इति स्थिते ॥ ४२ ॥

[डूणः ४३]–संख्यासम्बन्धिनो डकारस्य णत्वं भवति नामि परे । ष्टुभिः ष्टुः षण्णां[1] षट्सु । क्वचिदपदान्ते पदान्तताश्रयणीया ॥ ४३ ॥

[दोषां[2] ४४]–दोष् सजुष् आशिष् हविष् प्रभृतीनां षकारस्य रेफो भवति रसे पदान्ते च । दोः दोषौ दोषः । दोषं दोषौ । दोष्शब्दस्य शसादौ स्वरे परे नान्तता वा वक्तव्या । दोषः दोष्णः । दोषा दोष्णा दोर्भ्यां दोर्भिः इत्यादि । सजूः सजुषौ सजुषः ।

सजुषाशिषो रसे पदान्ते च दीर्घो वक्तव्यः ॥ सजूर्भ्यामित्यादि ॥ ४४ ॥

[पुंसोऽसुङ् ४५]–पुंस्शब्दस्य पञ्चसु परेषु असुङादेशो भवति ङकारोऽन्त्यादेशार्थः ॥ ४५ ॥

---

१ षण्णामित्यत्र षोड इत्यनेन डत्वं परं च तत्र पदान्तपरकत्वं स्वीक्रियते प्रकृते तदभावात् कथं डत्वमत आह क्वचिदिति । २ रोरात्रिषु इत्यतो रोऽनुवर्तते स च दोषामिति षष्ठीनिर्दिष्टत्वात् अन्तादेशः स्यादित्यर्थः ।

[स्वरे मः ४६]—अनुस्वारस्य मकारो भवति। पुम् अस् इति स्थिते । वृतोनुम् । न्संमहतोऽधौ दीर्घः शौ च । संयोगान्तस्य लोपः । पुमान् पुमांसौ पुमांसः । पुमांसं पुमांसौ पुंसः । पुंसा पुंभ्यां पुंभिः । हे पुमन् ॥ ४६ ॥

[असंभवे[1] पुंसः कक् सौ ४७]—वेदान्तैकवेद्यस्यात्मनो बहुत्वासम्भवेऽर्थे वाच्ये सति पुंस्शब्दस्य सुपि परे कगागमो भवति ॥ ४७ ॥

[स्कोराद्योश्च ४८]—संयोगाद्योः सकारककारयोर्लोपो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च । पुंक्षु । एवं विद्वस्शब्दः । विद्वान् विद्वांसौ विद्वांसः । विद्वांसं विद्वांसौ ॥ ४८ ॥

[वसोर्वउः ४९]—वसोः सम्बन्धिनो वकारस्य

---

१ एतत्सूत्रं माधवप्रभृतीनामसंमतत्वात् उपेक्ष्यम् । २ एकदानुभूतिस्वरूपाचार्यः स्वमुखासंस्कृतपदानिर्गोल्लितत्वेन पंडितैर्धिक्कृतः, तदा वाग्देवतामद्दुपासनया सप्तशतसूत्रविलक्षणं सूत्रमचीकरत् तेन च पुंक्ष्विति सिद्धिः नान्यथा इति भावः ।

उत्वं प्राप्नोति शसादौ स्वरे परे तद्धिते ईपि ईकारे च। विदुषः। विदुषा। वसांरसे। विद्वद्भ्यां विद्वद्भिः। विद्वत्सु इत्यादि। सुवचस् शब्दस्य अत्वसोः सौ इति दीर्घः। सुवचाः सुवचसौ सुवचसः। हे सुवचः। सुवचसं सुवचसौ सुवचसः। सुवचसा सुवचोभ्यां सुवचोभिः। उशनस् शब्दस्य भेदः॥ ४९॥

[उशनसां ५०]—उशनस् पुरुदंसस् अनेहस् इत्येतेषां सेरधेर्डा भवति। डकारष्टिलोपार्थः। उशना[1]। उशनसौ॥ ❋उशनसो धौ सान्तता नान्तता अदन्तता वा वक्तव्या ❋ हे उशनः हे उशनन् हे उशन।

अदस्शब्दस्य विशेषः त्यदादेष्टेरिति सर्वत्राकारः। अद सि इति स्थिते॥ ५०॥

[सौ सः ५१]—अदसो दकारस्य सौ परे सत्वं भवति॥ ५१॥

[सेरौ ५२]—अदसः सेरौ भवति। असौ।

---

१ उशना भार्गवः कविः इत्यमरः।

द्विवचने अदस् औ इति स्थिते । दस्य मः ॥ ५२ ॥

[मादू ५३]—उश्च ऊश्च ऊ । अदसो मकारात्परस्य ह्रस्वस्य ह्रस्व उकारो भवति दीर्घस्य च दीर्घ ऊकारो भवति । अमू । बहुवचने सर्वादित्वाज्जसी अद इ । अमे इति स्थिते ॥ ५३ ॥

[एरी बहुत्वे ५४]—बहुत्वे सत्यदस एकारस्य ईकारो भवति । अमी । अमुं अमू अमून् । मत्वे उत्वे च कृते टानास्त्रियां । अमुना । द्विवचने अद्धीत्यात्वं पश्चादुकारः । अमूभ्यां ॥ ५४ ॥

[भिसूभिस् ५५]—इदमदसोर्भिस् भिसेव भवति न भकारस्याकारः । अमीभिः । अमुष्मै अमूभ्यां अमीभ्यः । अमुष्मात् अमूभ्यां अमीभ्यः । अमुष्य । ओसि एत्वे अयादेशे च कृते पश्चादुकारः । अमुयोः अमीषां । अमुष्मिन् अमुयोः अमीषु ॥ ५५ ॥

[सामान्ये अदसः[१] कः स्यादिवच्च ५६]—अमुकः अमुकौ[२] अमुके ॥ ५६ ॥

इति हसान्ताः पुँल्लिङ्गाः ॥

अथ हसान्ताः स्त्रीलिंगाः ।

तत्र हकारान्त उपानह् शब्दः ।

[नहो धः १]—नहो हकारस्य धकारादेशो भवति रसे पदान्ते च । वावसाने धस्य दत्वं तत्वं । उपानत् उपानद् उपानहौ उपानहः । हे उपानत् । उपानहं उपानहौ उपानहः । उपानहा उपानद्भ्यां उपानाद्भिः इत्यादि ॥ १ ॥

वकारान्तो दिव् शब्दः ।

[दिव औ २]—दिवो वकारस्य औकारादेशो भवति सौ परे । द्यौः दिवौ दिवः । हे द्यौः ॥ २ ॥

---

१ अवयवावयविसम्बंधे षष्ठी तेन अदसोऽवयवः कः प्रत्ययो भवति इत्यर्थः । अत्र अदस इत्युपलक्षणं सर्वादीनां तेन यकः सकः एषक इत्यादि सिद्धयति । २ इदं चेदानींतनैः पण्डितंमन्यैः सामान्ये अदस इत्यन्यथाकृत्वा प्रयुक्तं युक्तंचैतत् असकाविति ।

[वाऽमि ३]—दिवो वकारस्य अमि परे वा आत्वं भवति । द्यां दिवं दिवौ दिवः । दिवा ॥ ३ ॥

[ऊरसे ४]—दिवो वकारस्य रसे परे उकारो भवति । द्युभ्यां द्युभिः द्युषु । इत्यादि ॥ ४ ॥

रेफान्तश्चतुर्शब्दो नित्यं बहुवचनान्तः ।

[त्रिचतुरोः स्त्रियां तिसृचतसृवत् ५]—स्त्रियां वर्तमानयोः त्रिचतुर्शब्दयोः तिसृचतसृ इत्येतावादेशौ भवतः विभक्तौ परतः । ऋकारश्च ऋकारवत् । ततस्तुरार इत्यार न भवति । तिस्रः । तिस्रः । तिसृभिः । तिसृभ्यः ॥ ५ ॥

[न तिसृ चतसृ छन्दसि वा ६]—इत्येतयोर्दीर्घो न भवति नामि परे । तिसृणां । छन्दसि तु भवति । तिसॄणां । तिसृषु । एवं चतसृ ॥ ६ ॥

गिर्शब्दस्य भेदः ।

---

१ एतच्च वार्तिकं अतएव अमि दिवो वा आकारादेशो वक्तव्यः इत्यर्थमकरोन्माधवः ।

[र्वोर्विहसे ७] धातोरिकारोकारयोर्दीर्घो भवति रेफवकारयोर्हसपरयोः पदान्ते च । गीः गिरौ गिरः । हे गीः । गिरं गिरौ गिरः । गिरा गीर्भ्यां गीर्भिः । गीर्षु । एवं धूः धुरौ धुरः। हे धूः । पूः पुरौ पुरः । हे पूः । पुरा पूर्भ्यां पूर्भिः । पूर्षु ।

धकारान्तःसमिध्शब्दः ।

समित् समिद् समिधौ । हे समित् हे समिद् । समिद्भ्यां समिद्भिः । समित्सु ।

भकारान्तः ककुभ्शब्दः ।

ककुप् ककुब् ककुभौ ककुभः । हे ककुप् हे ककुब् इत्यादि । दकारान्तास्त्यदादयस्तेषां त्यदादेष्टेरिति सर्वत्राकारः । आबतः स्त्रियामित्याप् । स्या त्ये त्याः । सा ते ताः । या ये याः । एषा एते ए-

---

१ अत्र धातोः प्रेरणे इत्यतो धातोरित्यनुवर्तते । २ हसः परो याभ्यां तौ हसपरौ तयोर्हसपरयोः । ३ विसर्गनुमस्थानिकानुस्वारव्यवधानेपि क्विलात्परस्य सस्य षः । ४ "इध्ममेधः सामित् स्त्रियाम् इत्यमरः" ।

ताः। अन्वादेशे। एतां एनां एते एने एताः ए-
नाः। एवं किम्। का के काः ॥७॥

[इयं स्त्रियां ८] इदम्शब्दस्य स्त्रियामियं भ-
वति सौ परे। इयं इमे इमाः। इमां इमे इमाः।
अनया आभ्यां आभिः। अस्यै आभ्यां आभ्यः।
इत्यादि।

चकारान्तस्त्वच्शब्दः।

चोः कुरिति कुत्वं। त्वक् त्वग् त्वचौ त्वचः। त्व-
ग्भ्यां। त्वक्षु। हे त्वक्। एवं ऋच् वाच् प्रभृतयः।

अप्शब्दो नित्यं बहुवचनान्तः।

अप् जस् इति स्थिते। न्सम्महत इति दीर्घः।
आपः। द्वितीयाबहुवचने पञ्चसु इति विशेषणात्
न दीर्घः। अपः ॥ ८ ॥

[भिदपां[1] ९] अबादीनां भकारे परे दत्वं भ-

---

१ अपामिति बहुवचनं चिन्त्यम्।

वति । अद्भिः । अद्भ्यः अपां । अप्सु ॥ ९ ॥

शकारान्तो दिश् शब्दः ॥

[दिशां कः १०] दिश् दृश् स्पृश् इत्यादिना रसे पदान्ते च कत्वं भवति। दिक् दिग् दिशौ दिशः। हे दिक् हे दिग् । दिशं दिशौ दिशः । दिशा दिग्भ्यां दिग्भिरित्यादि ।

षकारान्तस्त्विष्शब्दः ।

षोड इति डत्वं वावसाने टकारः । त्विट् त्विड् त्विषौ त्विषः । त्विषा त्विड्भ्यां त्विड्भिः । इत्यादि आशिष्शब्दस्य सजुष्शब्दवद्रूपं ज्ञेयं । आशीः आशिषौ आशिषः । आशीर्भ्यां । आशीष्षु । हे आशीः । स्त्रीलिंगस्यादस्शब्दस्य सौ न विशेषः । द्विवचनादौ टेरत्वे मत्वे च कृते अनन्तरमावतः स्त्रियामित्याप् दीर्घत्वं विभक्तिकार्यं पश्चान्माद्दु इति ह्रस्वस्य दीर्घस्य उकार ऊकारश्च । असौ अमू अमूः । अमुं अमू अमूः । अमुया अमूभ्यां

अमूभिः । अमुष्यै अमूभ्यां अमूभ्यः । अमुष्याः अमूभ्यां अमूभ्यः । अमुष्याः अमुयोः अमूषां । अमुष्यां अमुयोः अमूषु ॥ १० ॥

इति हसान्ताः स्त्रिलिंगाः ।

अथ हसान्ता नपुंसकलिंगाः प्रदर्श्यन्ते

रेफान्तो वार्शब्दः ।

[नपुंसकात्स्यमोर्लुक् १]—वाः वारी वारि २ । अयम इति विशेषणात् नुम् न भवति । वारा वार्भ्यां वार्भिः। वारे इत्यादि। चतुर्शब्दे[१] चतुराम्शौचेत्याम्। चत्वारि। चत्वारि। चतुर्भिः। चतुर्भ्यः। चतुर्भ्यः। चतुर्णां। चतुर्षु॥ १ ॥

नकारान्तोऽहन् शब्दः ।

[अह्नः सः २] अहन् शब्दस्य नकारस्य सकारो भवति रसे पदान्ते च । स्रोर्विसर्गः । अहः । इमौ । वेङ्योः । अह्नी अहनी अहानि । अह्ना अहो-

१ चतुर् शब्दो नित्यंबहुवचनान्तः ।

भ्यां अहोभिः । अह्ने अहोभ्यां अहोभ्यः । अह्नः अह्नोः अह्नां । अह्नि अहनि अह्नोः अहस्सु ।
ब्रह्मन्शब्दस्य रसे पदान्ते च नस्य लोपो वक्तव्यः । ब्रह्म ब्रह्मणी ब्रह्माणि । पुनः । ब्रह्म ब्रह्मणी ब्रह्माणि । ब्रह्मणा ब्रह्मभ्यां ब्रह्मभिः इत्यादि । सम्बोधने[1] धौ नपुंसके न लोपो वा वक्तव्यः ॥ हे ब्रह्म ब्रह्मन् । एवं चर्मन् वर्मन् शर्मन् कर्मन् व्योमन् दामन् नामन् प्रभृतयः ।

❀ नान्तादन्ताच्छन्दसि ङिश्योर्लोपो वक्तव्यः ❀

❀ छन्दस्यागमजानागमजयोर्लोपालोपौ च वक्तव्यौ ❀

परमे व्योमन्[2], सर्व्वाभूतानि । त्यदादीनां स्यमोर्लुकि कृते टेरत्वं न भवति । स्यादावितिविशेषणात् । द्विवचनादौ टेरत्वे कृते सर्वशब्दवद्रूपं

१ संबोधनार्थके धौ क्लीबविशिष्टे च नकारस्य लोपो वा स्यादित्यर्थः ।

२ यथापरमेव्योमनि यथा च सर्वाणिभूतानि इत्यादौ आगमजस्यङेः शेर्लोपस्तत एव तद्रूपसिद्धेः ।

ज्ञेयम् । त्यत् त्ये त्यानि । पुनः त्यत् त्ये त्यानि । त्येन त्याभ्यां त्यैरित्यादि । एवं तत् ते तानि २ । यत् ये यानि २ । एतत् एते एतानि २ । किं के कानि २ । इदम् इमे इमानि २ । तृतीयादौ सर्वत्र पुंवत् ।

चकारान्तः प्रत्यच् शब्दः ।

प्रत्यक् प्रत्यग् दीर्घश्च । प्रतीची । नुमयमः प्रत्यञ्चि ।

तकारान्तो जगत्शब्दः ।

जगत् जगती जगन्ति । जगद्भ्यां जगद्भिरित्यादि । महच्छब्दे तु न्संमहत इति सिविषये दीर्घो न । महत् महती महान्ति २ । इत्यादि । षकारान्तो हविष्शब्दः । सजुष् च । हविः हविषी हवींषि २ । इत्यादि । सजूः सजुषी सजूंषि २ । एवं सकारान्ताः पयस्तेजस्वर्चस्प्रभृतयः । पयः पयसी पयांसि २ । पयसा पयोभ्यामित्यादि । अदस् शब्दस्य स्यमोर्लुकि कृते स्त्रोर्विसर्गः । द्विवचनादौ टेरत्वे कृते मत्वोत्वे । अदः अमू अमूनि । पुनः २

अमुना अमूभ्या अमीभिः। अमुष्मै अमूभ्यां अमीभ्यः । अमुष्मात् । अमुष्य अमुयोः अमीषां। अमुष्मिन् अमुयोः अमीषु। शेषं पुँल्लिंगवत्॥२॥

इति हसान्ता नपुंसकलिंगाः ।

अथ युष्मदस्मदोः स्वरूपं निरूप्यते।

तयोश्च वाच्यलिङ्गत्वात् त्रिष्वपि लिङ्गेषु समानं रूपम्

[त्वमहंसिना १]—युष्मदस्मदोः सिसहितयोस्त्वमहमित्येतावादेशौ भवतः यथासंख्येन। त्वंअहं॥१॥

[युवावौ द्विवचने २] युष्मदस्मदोर्द्विवचने परे युवाव इत्येतावादेशौ भवतः ।

[आमौ]—युष्मदस्मदोःपर औ आम् भवति । युवां आवां ॥ २ ॥

[यूयं वयं जसा ३] जसा सहितयोर्युष्मदस्मदोर्यूयं वयं इत्येतावादेशौ भवतः । यूयं वयं ॥ ३ ॥

१ सिनेतिसहादियोगे तृतीया तेन सिप्रत्ययेन सहितयोरित्यर्थः ननु त्वमहमोर्हसान्तत्वात् सिलोपः सिद्धः पुनः किमर्थं व्यर्थः परिश्रमः सिनेतिमान्तत्वस्य तथा तकारोच्चारणस्य गौणे अतित्वमित्यादौ चरितार्थत्वात् ।

[त्वन्मदेकत्वे ४]—युष्मदस्मदोः त्वत् मत् इत्येतावादेशौ भवतः एकत्वे गम्यमाने । एकत्वं नाम एकार्थवाचित्वं नत्वेकवचनं तेन त्वत्पुत्रो मत्पुत्र इत्यादौ त्वन्मदादेशौ भवत एव ॥ ४ ॥

[आम्स्भौ ५]—युष्मदस्मदोष्टेरत्वं भवति अमि सकारे भिसि च परे। त्वां मां। युवां आवां। त्यदादेष्टेरत्वे कृते शसीति दीर्घत्वम्।

❋ शसो नो वक्तव्यः ❋

युष्मान् अस्मान्। त्वन्मदादेशे कृते ॥ ५ ॥

[एटाङ्योः ६]—युष्मदस्मदोष्टेरेत्वं भवति टाङि इत्येतयोः परयोः अयादेशः त्वया मया। युवाभ्यां आवाभ्यां। युष्माभिः अस्माभिः ॥ ६ ॥

[तुभ्यं मह्यं ङया ७]—ङेसहितयोर्युष्मदस्मदोस्तुभ्यंमह्यमित्येतावादेशौ भवतः। तुभ्यं मह्यं। युवाभ्यां आवाभ्यां ॥ ७ ॥

---

१ अन्यथा त्यदादेष्टेरः स्यादाविति अत्वेङे भगिति स्यात्।

[भ्यसभ्यम् ८]–युष्मदस्मद्भ्यां परो भ्यस् शभ्यं भवति। शकारो भकारादित्वव्यावृत्त्यर्थः तेनात्वैत्वे न भवतः। युष्मभ्यं अस्मभ्यं ॥ ८ ॥

[ङसिभ्यसोः श्तुः ९]–पञ्चम्या ङसिभ्यसोः श्तुर्भवति। शकारः सर्वादेशार्थः। त्वत् मत्। युवाभ्यां आवाभ्यां। युष्मत् अस्मत् ॥ ९ ॥

[तव मम ङसा १०]–ङसा सहितयोर्युष्मदस्मदोस्तव मम इत्येतावादेशौ भवतः। तव मम। युवयोः आवयोः। सर्वादित्वात्सुट् ॥ १० ॥

[सामाकं ११]–युष्मदस्मद्भ्यां परः साम् आकम् भवति। युष्माकम् अस्माकम्। त्वयि मयि। युवयोः आवयोः। युष्मासु अस्मासु।

अथाऽनयोरादेशविशेष[1]विधिः प्रदर्श्यते ॥ ११ ॥

[युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिरतेमवान्नौवसूनसौ १२]–तत्रैकवचनेन सह ते मे भवतः। द्वि-

१ विशेषेण विधीयते यस्यां सा विशेषविधिः आदेशस्य विशेषविधिरिति तथा।

चनेन सह वां नौ । बहुवचनेन सह वसूनसौ॥१२॥

स्वामी ते से समायातः स्वामी मे सांप्रतं गतः ।
नमस्ते भगवन् भूयो देहि मे मोक्षमक्षयं॥१॥

स्वामी वां स जहासोच्चै दृष्ट्वा नौ दानयाचनां । राजा वां दास्यते दानं ज्ञानं नौ मधुसूदनः॥२
देवो वामवताद्विष्णुर्नरकान्नौ जनार्दनः । स्वामी वो बलवान् राजा स्वामी नौ ऽसौ जनार्दनः॥३॥

नमो वो ब्रह्मविज्ञेभ्यो ज्ञानं नो दीयतां धनम् । सानन्दा वः प्रपश्यामः पश्यामो नः सुदुःखिनः ४

[त्वामामा १३]—अमासहितयोर्युष्मदस्मदोस्त्वामादेशौ भवतः । पश्यामि त्वां मदालीढं पश्य मां मदभेदकं । पश्यामि त्वां जगत्पूज्यं पश्य मां जगतांपते ॥ १३ ॥

[नादौ १४]—पादादौवर्तमानयोर्युष्मदस्मदोर्नैते आदेशा भवन्ति । रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता । स एव नाथो भगवानस्माकं पापना-

शनः ॥ पादादाविति किं । पान्तु वो नरसिंहस्य नखलाङ्गलकोटयः । हिरण्यकशिपोर्वक्षःक्षेत्रासृक्कर्दमारुणाः ॥ १४ ॥ इति षड्लिङ्गाः ।

अथाऽव्ययानि ।

[चादिभिश्च १५]—चादिभिरपि योगे नैते आदेशा भवन्ति । तव चायं प्रभुर्विष्णुर्मम चा यं तथैव च । तव ये शत्रवो राजन् मम तेऽप्यतिशत्रवः ॥१५॥

[चादिर्निपातः १६] चादिर्गणो निपातसंज्ञको भवति । च वा ह अह एव एवं नूनं पृथक् विना नाना स्वस्ति अस्ति दोषा मृषा मिथ्या मिथस् अथ अथो ह्यस् श्वस् उच्चैस् नीचैस् शनैस् स्वर् अन्तर् प्रातर् पुनर् भूयस् आहो स्वित् उत सह ऋते अन्तरेण अन्तरा नमस् अलम् कृतं । अमानोनाप्रतिषेधे। ईषत् किल खलु वै आरात् भृशं यत् तत् स्वराश्च इत्येवं चादिर्गणो निपातसंज्ञो भवति ॥ तत्रादिर्गणो विभक्त्यर्थे निपात्यते । तस्मिन्निति तत्र । यस्मिन्निति

यत्र । कस्मिन्निति कुत्र । क्व कुह । अस्मिन्निति अत्र । कस्मिन् काले कदा । तस्मिन् काले तदा । यस्मिन् काले यदा । एकस्मिन्काले । सर्वस्मिन्काले सर्वदा । एकदा । तेन प्रकारेण तथा । एवं यथा कथं । अनेन प्रकारेण इत्थं । तस्मादिति ततः । एवं कुतः अतः इतः । सार्वविभक्तिकस्तासिरित्येके । पूर्वस्मिन्निति पुरस्तात् । परस्मिन्नितिपरेण । आ[1]हि च दूरे । दक्षिणा[2]हि वसन्ति चाण्डालाः । किमः सामा[3]न्ये चिदादिः । कश्चित् कश्चन क्वचन । तदधीनकार्त्स्न्ययोर्वासात् । राजाधीनं राजसात् । सर्वं भस्म करोति इति भस्मसात् । ऊर्युररर्यंगीकरणे । ऊरीकृत्य उररीकृत्य । सद्यआदिः काले निपात्यते । सद्यः अद्य सपदि अधुना सांप्रतं । शीघ्रं झटिति पूर्वेद्युः अन्येद्युः परेद्युः उभयेद्युः । यर्हि तर्हि काले ॥१६॥

---

१ दूरेऽर्थेवाच्येसति आहिप्रत्ययोभवति । २ दक्षिणस्यांदिशि दूरे चांडालाश्चान्त्यजा निवसन्ति । ३ प्रकृत्या अविशेषेऽर्थे ।

[प्रादिरुपसर्गः १७] प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप अन्तर् आविर् अयं गण उपसर्गसंज्ञकः ॥ १७ ॥

[प्राग्धातोः १८]–उपसर्गा धातोः प्राक् प्रयोक्तव्याः ॥ १८ ॥

[तदव्ययं १९] तदिदं चादिरूपमव्ययसंज्ञं भवति ॥ १९ ॥

[क्त्वाद्यन्तं च २०] क्त्वा क्यप् तुम् नम् च्वि डा धा वतु आम् कृत्वस् शस् इत्याद्यन्तमव्ययसंज्ञं भवति ॥ २० ॥

[अव्ययाद्विभक्तेर्लुक् २१]–अव्ययात्परस्य विभक्तेर्लुग् भवति न तु शब्दनिर्देशे। अव्ययानां न च लिङ्गादिनियमः। उक्तं हि। सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययं ॥ उक्तान्यव्ययान्यलिङ्गानि ॥ २१ ॥

इत्यव्ययानि ॥

अथ स्त्रीप्रत्ययाः ।

अधुना लिङ्गविशेषविजिज्ञापयिषया स्त्रीप्रत्ययाः प्रस्तूयन्ते ।

[आबतः स्त्रियां १]–अकारान्तान्नाम्नः[1] स्त्रियां वर्त्तमानादाप्प्रत्ययो भवति जाया माया मेधा श्रद्धा धारा इत्यादि ॥

❋ अजादेश्चाप्[2] वक्तव्यः ❋

अजा एडका कोकिला बाला वत्सा शूद्रा गणिका ॥ १ ॥

[काप्यतः २]–कापि परे पूर्वस्याकारस्य इकारो भवति। कारिका पाठिका कालिका तालिका। वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः । आपञ्चैव हसान्तानां यथा वाचा निशा दिशा ॥ अवगाहः वगाहः अपिधानं पिधानं ॥ २ ॥

[ह्रस्वो वा ३] स्त्रियां कापि[3] परे तरादौ च

---

१ तस्मादित्यतो नाम्न इत्यनुवर्तनीयम् । २ अविहितलक्षण आप अजादौ ज्ञेयः । ३ काप्यत इत्यस्मात् कापि परे इत्यनुवर्तनीयम् ।

पूर्वस्य ह्रस्वो वा भवति । वेणिका वेणीका नदिका नदीका श्रेयसितरा श्रेयसीतरा श्रेयसितमा श्रेयसीतमा । नौकादौ न भवति वाग्रहणादियं विवक्षा । निश्चयेन पतन्त्यनेकेष्वर्थेष्विति निपातानामनेकार्थत्वात् ॥ ३ ॥

(ऋन ईप् ४) नकारान्तादृकारान्तादणंताच्च स्त्रियामीप्प्रत्ययो भवति । दण्डिनी दन्तिनी करिणी मालिनी ।

❀ ईपि राज्ञो[1]ऽलोपो वक्तव्यः ❀

राज्ञी । शुनी कर्त्री हर्त्री औपगवी ॥ ४ ॥

[यस्य लोपः ५]–इश्चअश्च यस्तस्य लोपो भवति स्वरे यकारे च परे ॥ ५ ॥

[षट्व्रितः ६]–षकार टकार उकार ऋकारानुबन्धात् स्त्रियामीप्प्रत्ययो भवति । ष, वराकी । ट, कुरुचरी । उ, गोमती ॥ ६ ॥

---

१ ईपिसातिराज्ञइत्येतत्संयुक्ताक्षरस्य योह्यकारस्तस्य लोपः स्यादिति वक्तव्यार्थः ।

[अप्ययोराग्निनित्यम् ७]—अप्प्रत्ययप्रत्ययसम्बन्धिनोऽवर्णात् परस्य शतुर्नित्यं नुमीकारे ईपि च परे। ऋ, पचन्ती पठन्ती इत्यादि ॥ ७ ॥

[नदादेः ८]—नदादेर्गणात् स्त्रियामीप् प्रत्ययो भवति। नदी गौरी गौतमी ॥ ८ ॥

[इन्द्रादेरानीप्[1] ९]—इन्द्रादेर्गणादानीप् प्रत्ययो भवति। इन्द्राणी भवानी शर्वाणी ॥ ९ ॥

[ईप् समाहारे गुणश्च १०]—समाहारार्थे ईप् प्रत्ययो भवति गुणश्च। त्रयी पञ्चकुली ॥ १० ॥

[पुंयोगेच ११]—अकारात् पुंयोगे ईप्प्रत्ययो भवति शूद्रस्य स्त्री शूद्री गणकी ॥ ११ ॥

[जातेरयोपधात् १२]—जातिवाचिनोऽयकारोपधादकारान्तात् स्त्रियामीप्प्रत्ययो भवति। मेषी सूकरी हंसी कुक्कुटी ब्राह्मणी। अयकारोपधादिति-

---

१ ननुच इन्द्रादिभ्योऽदन्तेभ्योनीप्यपि सवर्णदीर्घे कृते सेत्स्यत्येवेन्द्राणीत्याद्यपि किमाकारेण नचवाच्यं अलोपः स्यादिति अनीपोअदुपदेशसामर्थ्यात् एवंतर्हि इन्द्रयाते तत्स्त्रीइन्द्राणी इत्यादि हसान्ताच्छ्रवणार्थमाकारोपदेशः।

किम्। क्षत्रिया वैश्या। ❀ प्रथमवयोवाचिनोऽत ईप् वक्तव्यः ❀

कुमारी किशोरी कलभी प्रथमग्रहणात् किं वृद्धा स्थविरा अद्ग्रहणादिति किम्। शिशुः ॥ १२ ॥

[स्वाङ्गाद्वा १३] स्वाङ्गवाचिनो वा स्त्रियामीप् प्रत्ययो भवति। सुमुखी मृगाक्षी तन्वङ्गी। वाग्रहणात् पद्मवदना कमलवदना इत्यादौ न भवति।

❀ कृदिकारादक्तेरीब् वा वक्तव्यः ❀

अंगुलिः अंगुली धूलिः धूली आजिः आजी। अक्तेरिति विशेषणात् कृतिः भूतिः ॥ १३ ॥

[ऐच मन्वादेः १४]—मन्वादेर्गणात् स्त्रियामीप्प्रत्ययो भवति ऐकारादेशश्च। मनायी। चकारान्मनोरौ वा। मनावी। वृषाकपायी ॥ १४ ॥

[पत्न्यादयः १५]—पत्न्यादयो निपात्यन्ते। पत्नी अंतर्वत्नी सखी आशिश्वी अर्द्धजरती युवती। प्राची प्रतीची उदीची समीची। दारशब्दो नित्यं ब-

हुवचनान्तः पुंलिङ्गः। दाराः दारान् दारैः दारेभ्यः२ दाराणां दारेषु। हे दाराः ॥ १५ ॥

[वोर्गुणात् १६]—उकारान्ताद् गुणवाचिनो वा स्त्रियामीप् प्रत्ययो भवति। पट्वी पटुः मृद्वी मृदुः तन्वी तनुः ऋज्वी ऋजुः ॥ १६ ॥

[उत ऊः १७]—उकारान्तान्मनुष्यजातेः स्त्रियामूप्प्रत्ययो वा भवति। पगूः पंगुः वामोरूः वामोरुः ॥ १७ ॥

[यूनस्तिः १८]—युवन्शब्दात् स्त्रियां तिःप्रत्ययो भवति। युवतिः। एभ्यो नामत्वात् स्यादयः। आबन्तादाप्। आप इति सिलोपः। ईबन्ताद्धसेपः-सेर्लोपः पूर्ववत् प्रक्रिया ॥ १८ ॥

॥ इति स्त्रीप्रत्ययाः ॥

---

१ गुणलक्षणं तु महाभाष्ये द्रष्टव्यम् ॥ सत्वे निविशतेपैति पृथक् जातिषु दृश्यते ॥ आधेयश्च क्रियाजश्च सोसत्वप्रकृतेर्गुणः ॥ १ ॥

अथ कारकाणि ।

अथ विभक्त्यर्थो निरूप्यते ।

[लिंगार्थे प्रथमा १]—धातुप्रत्ययातिरिक्तमर्थवच्छब्दरूपं लिङ्गं तस्यैवार्थे सन्मात्रे प्रथमाविभक्तिर्भवति । लिङ्गादयोऽपि प्रथमार्था इति केचित् । तत्सद्ब्रह्म ॥ १ ॥

[अन्योक्ते प्रथमा २]—रविरिव राजते राजा । रोषात्कुमारी रोरूयते । बोभुज्यते भुवं भूपालः । प्रागास्तां रामलक्ष्मणौ । यदा कर्त्ता प्रथमान्तः कर्म्मणि द्वितीया तदा । यदा कर्त्ता तृतीयान्तः कर्म्मणि प्रथमा तदा । 'सान्ति सन्तः कियन्तः' । कुमाराः शेरते स्वैरं रोरूयन्ते च नारकाः । जेगीयन्ते च गीतज्ञा मेम्रियन्ते रुजार्दिताः ॥ २ ॥

---

१ यद्यत्र लिंगशब्दात्स्त्रीपुंनपुंसकानां ग्रहणं तदा स्त्रियां विशिष्टत्वात् परत्वाच्चाबादयः स्युः प्रथमाबाधकाः अतः पूर्वाचार्य्यसंज्ञा इत्येवाश्रयो वरीयान् ।

[आमन्त्रणेच ३]—आमन्त्रणमाभिमुखीकरणं तस्मिन्नर्थे प्रथमा विभक्तिर्भवति । मां समुद्धर गोविन्द प्रसीद परमेश्वर । कुमारौ स्वैरमासाथां क्षमध्वं भोस्तपस्विनः ॥ ३ ॥

[भोसः ४]—भोस् भगोस् अघोस् एते शब्दा निपात्यन्ते धिविषेय । क्षमस्वभोदुरारोध्यभगोस्तुभ्यं नमोस्तुते । अधीष्वभोर्महाप्राज्ञ घातयाघोस्स्वघस्मरम् ॥ ४ ॥

इति प्रथमा ॥ १ ॥

[शेषाः कार्ये ५]—कर्तृसाधनयोर्दानपात्रे विश्लेषावधौ सम्बन्धाऽऽधारभावयोः शेषा विभक्तयो द्वितीयाद्या एष्वऽर्थेषु भवन्ति ॥

कर्ता कर्म्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणमित्याऽऽहुः कारकाणि षट् ॥ कार्ये कर्म

कारके । उत्पाद्ये[1] आप्ये[2] संस्कार्य्ये विकार्ये[3] च द्वितीया विभक्तिर्भवति ।

कटं[2] करोति[3] कारुको[1] रूपं[5] पश्यति[6] चाक्षुषः[4] ।
राज्यं[8] प्राप्नोति[9] धर्म्मिष्ठः[7] सोमं[11] सुनोति[12] सोमपाः[10] ॥

अभि[1]सर्व्वतसोः कार्य्या[6] धिगुपर्यादिषु[3] त्रिषु[2] । द्विती[5]याऽऽम्रेडितान्तेषु[4] ततोऽन्यत्रापि[7] दृश्यते[2] । अभितो ग्रामं नदी वहति । सर्वतो ग्रामं वनानि सन्ति। धिग् देवदत्तं । उपर्य्युपरि ग्रामं मेघाः पतन्ति । अधोऽधो ग्रामं शलभाः पतन्ति । अध्यधि ग्रामं मृगाश्चरन्ति । समयानिकषाहाप्रति योगेऽपि । समया ग्रामं । निकषा ग्रामं । अनु ग्रामं ॥ ५ ॥

[कालाध्वनोर्नैरन्तर्येऽपि ६]—कालाध्वनोर्नैरन्तर्येऽपि द्वितीया विभक्तिर्भवति । मासमधीते । क्रोशं

---

१ यदसदुत्पद्यते सद्वा प्रकाश्यते तदुत्पाद्यं " यथा कटं करोति कारुकः " । २ प्रत्यक्षानुमानाभ्यां क्रियाजन्यं आप्यम् " यथारूपं पश्यति चाक्षुषः " । ३ यत्रलब्धसत्ताकमेवावस्थान्तरमापाद्यते तद्विकार्य्यम् यथा- " सोमंसुनोतिसोमपाः " ।

पर्वतः । नैरन्तर्याऽभावे मासस्य द्विरधीते । क्रोश-
स्यैकदेशे पर्वतः ॥ ६ ॥

॥ इति द्वितीया ॥ २ ॥

[कर्तरि प्रधाने क्रियाश्रये साधने च ७]—क्रि-
यासिद्ध्युपकारके करणेऽर्थे तृतीयाविभक्तिर्भवति ।
भिन्नैः शरेण रामेण रावणो लोकरावणः ॥ कराग्रे-
ण विदीर्णोऽपि वानरैर्युद्ध्यते पुनः ॥ ७ ॥

॥ इति तृतीया ॥ ३ ॥

[दानपात्रे चतुर्थी ८]—दानपात्रे सम्प्रदानका-
रके चतुर्थी । सम्यक् श्रेयोबुद्ध्या प्रदीयते तत्
सम्प्रदानं । ददाति दण्डं पुरुषो महीपतेर्नचातिभ-
क्त्या न च दानकाम्यया । यद्दीयते दानतया सु-
पात्रे तत्संप्रदानं कथितं मुनीन्द्रैः ॥
वेदविदे गां ददाति । अन्यत्र राज्ञो दण्डं ददाति ।
रजकस्य वस्त्रं ददाति ॥ ८ ॥

॥ इति चतुर्थी ॥ ४ ॥

[विश्लेषाऽवधौ पंचमी ९]–विश्लेषो विभाग-स्तत्र योऽवधिश्चलतयाऽचलतया वा विवक्षितस्तत्रा-पादाने पञ्चमी । धावतोऽश्वादपतत् । भूभृतोऽवतरति गंगा ॥ ९ ॥

॥ इति पंचमी ॥ ५ ॥

[सम्बन्धे षष्ठी १०]–सम्बन्धिनोर्मध्ये योऽप्रधानस्तत्र षष्ठी । भेद्यभेदकयोः श्लिष्टः सम्बन्धोऽन्योन्यमुच्यते । द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात् । एकक्रियातः परस्परापेक्षारूपः सम्बन्धः। राज्ञः स पुरुषो ज्ञेयः पित्रोरेतत् प्रपूजनम् । गुरूणां वचनं पथ्यं कवीनां रसवद्वचः ॥ १० ॥

॥ इति षष्ठी ॥ ६ ॥

[आधारे सप्तमी ११]–तदाधारोऽधिकरणं षड्-विधं । औपश्लेषिकं १ सामीप्यकं २ आभिव्यापकं ३ वैषयिकं ४ नैमित्तिकं ५ औपचारिकं ६ चेति । कटे

१ उपश्लेषेभवं औपश्लेषिकम् । २ समीपेभवं सामीप्यकम् ।

शेते कुमारोऽसौ वटे गावः सुशेरते । तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परं ॥ युद्धे सन्नह्यते धीरोंऽगुल्यग्रे करिणां शतम् ॥ ११ ॥

[भावः क्रियालक्षणं तत्रापि सप्तमी १२]—प्रसिद्धक्रियया । अप्रसिद्धक्रियाबोधनं भावः । वर्षतिदेवे चौरआगतः । पतत्यंशुमालिनिपतितोऽरातिः ।

अथोपपदविभक्त्यर्थौ निरूप्यते ।

विनासहनमस्कृतेनिर्द्धारणस्वाम्यादिभिश्च । एतैरपि योगे द्वितीयाद्या विभक्तयो भवन्ति । विना पापं सर्वं फलति । विना वातं विना वर्षं विद्युतः पतनं विना ॥ विना हस्तिकृतं दोषं के नेमौ पंति तौ द्रुमौ ॥ अन्तरेणाक्षिणी किं जीवितेनअन्तरात्वां मां हरिरित्यादिपदात् ग्राह्यं ॥ १२ ॥

[सहादियोगे तृतीया १३]—सह सदृशं साकंसार्धं समं योगेपि तृतीया॥ सहशिष्येणागतो गुरुः। सदृशश्चैत्रो मैत्रेण । साकं नयनाभ्यां श्लक्ष्णा दन्ताः।

सार्धं धनिभिर्धूतः साधुः । समं चन्द्रेणोदितो गुरुः १३

[नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगे चतुर्थी १४]–नमो नारायणाय । स्वस्ति राज्ञे । सोमाय स्वाहा । पितृभ्यः स्वधा । अलं मल्लो मल्लाय । वषडिंद्राय १४

[ऋते आदियोगे पंचमी १५]–ऋते ज्ञानान्न मुक्तिः । अन्यो ग्रहाद्विहारः ॥ १५ ॥

[ऋतेयोगे द्वितीयापि १६]–ज्ञानमृते ॥ १६ ॥

[विनायोगेऽपितृतीया १७]–ज्ञानेन विना १७

[दिग्योगे पंचमी १८]–पूर्वो ग्रीष्माद्वसन्तः १८

[निर्द्धारणे षष्ठीसप्तम्यौ १९]–निर्द्धारणं क्रियागुणजातिभिः समुदायात् पृथक्करणं तत्र षष्ठीसप्तम्यौ भवतः । क्रियापराणां भगवदाराधकः श्रेष्ठः क्रियापरेषु वा । गवां कृष्णा गौः संपन्नक्षीरा गोषु वा । एतेषां क्षत्रियः शूरतमः एतेषु वा ॥ १९ ॥

[स्वाम्यादियोगे षष्ठीसप्तम्यौ भवतः २०]–गोषु

स्वामी गवां स्वामी गवामधिपतिः गोष्वधिपतिः २०

[कर्तृकार्ययोरक्तादौ कृति षष्ठी २१]—कर्तरि कार्ये च षष्ठी विभक्तिर्भवति क्तादिवर्जिते कृदन्ते शब्दे प्रयुज्यमाने । व्यासस्य कृतिः । भारतस्य श्रवणम् ॥ २१ ॥

[स्मरतौ च कार्ये २२]—स्मरतौ धातौ प्रयुज्यमाने कर्मणि षष्ठी । मातुः स्मरति मातरं स्मरति ।

❀ हेतौ तृतीया पंचमी च वक्तव्या ❀

अनित्यः शब्दः कृतकत्वेन कृतकत्वाद्वा ॥ २२ ॥

[भयहेतौ पंचमी २३]—चौराद्बिभेति । व्याघ्रात्त्रस्यति । विद्युत्पाताच्चकितः ॥ २३ ॥

[षष्ठी हेतुप्रयोगे २४]—कस्य हेतोरियं कन्या । अन्नस्य हेतोर्वसति ॥ २४ ॥

[इत्थम्भावे तृतीया २५]—शिष्यं पुत्रेण[1] पश्यति । पश्यति संसारमसारेण । पुष्करिणीं नद्या पश्यति २५

१ पुत्रत्वेनैव पश्यति पुत्रमिति यावत् ।

[येनांगविकारः २६]—येनाङ्गेन विकृतेनाङ्गिनोंगविकारो लक्ष्यते तस्मादंगात्तृतीया विभक्तिर्भवति देवदत्तोऽक्ष्णा काणः । पादेन खञ्जः । कर्णेन बधिरः । शिरसा खल्वाटः ॥ २६ ॥

[जनिकर्तुः प्रकृतिः२७]—जायमानस्य कार्यस्योपादानमपादानसंज्ञं भवति । तत्रापादाने पञ्चमी । यस्मात्प्रजाः प्रजायन्ते तद्ब्रह्मेति विदुर्बुधाः ॥२७॥

[आङादियोगे पंचमी २८]—आ पाटलिपुत्राद्वृष्टो देवः ॥ २८ ॥

[तादर्थ्ये चतुर्थी २९]—संयमाय श्रुतं धत्ते नरो धर्माय संयमं । धर्मं मोक्षाय मेधावी धनं दानाय मुक्तये ॥ २९ ॥

[क्रुध्यादियोगे चतुर्थी ३०]—क्रूराय क्रुध्यति । मित्राय द्रुह्यति गुणवते असूयति ।

❋ क्यब्लोपे पञ्चमी वक्तव्या ❋

---

१ पाटलीपुत्रमभिव्याप्य देववर्षणं जातम् ।

हर्म्म्यात्[1] प्रेक्षते आसनात्[2] प्रेक्षते ।

❀ निमित्तात्कर्मयोगे सप्तमीच वक्तव्या ❀

चर्म्मणि[2] द्वीपिनं[1] हन्ति[3] दन्तयो[4]र्हन्ति[6] कुञ्जरम्[5] । केशेषु[7] चमरीं हन्ति[9] सीम्नि[10] पुष्कलको[11] हतः[12] ॥ ३० ॥

[विषये च ३१]—तर्के चतुरः ॥ ३१ ॥

[षष्ठीसप्तम्यौ चानादरे ३२]—बहूनां क्रोशतां गतश्चौरः । बहुष्वसाधुषु निवारयत्स्वपि स्वयमार्यो याति साधुमार्गेण । बहुषु साधुषु वदत्स्वपि स्वयमनार्यो यात्यसाधुमार्गेण । मातापित्रो रुदतोः प्रव्रजति पुत्रः ॥ ३२ ॥

[अन्योक्ते प्रथमा ३३]—यदिदं कार्यत्वादन्येनाख्यातेन कृता चोक्तं भवति तदा प्रथमा प्रयोक्तव्या । घटः क्रियते । पटः कार्यः ।

---

१ हर्म्यमारुह्य प्रेक्षते इत्यर्थः । २ आसनमारुह्य प्रेक्षते इत्यर्थः ।

[छन्दसि स्यादिः सर्वत्र ३४]-दध्ना[1] जुहोति पुनंतु ब्रह्मणस्पतिः । व्रजतीर्विरेजुः ॥ ३४ ॥

इति कारकप्रक्रिया समाप्ता ॥

अथार्थवद्विभक्तिविशिष्टानांपदानां[2]समासोनिरूप्यते [समासश्चान्वये नाम्नां १]-नाम्नामन्वययोग्यत्वे सत्येव समासो भवति चशब्दात्तद्धितेऽपि भवति । ततो भार्या पुरुषस्येत्यादौ न भवति परस्पर मसम्बन्धात् । सच षड्विधः । अव्ययीभावस्तत्पुरुषो द्वंद्वो बहुब्रीहिः कर्म्मधारयो द्विगुश्चेति। तत्र पूर्वपदप्रधानोऽव्ययीभावः । द्विगुतत्पुरुषौ परपदप्रधानौ द्वन्द्वकर्मधारयौ चोभयपदप्रधानौ । बहुब्रीहिरन्यपदप्रधानः। तस्य क्रियाभिसम्बन्धात् उभयपदप्रधानो बलवान्। ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वञ्च समासप्रयोजनं । स्त्रियमधिकृत्य भवतीति विग्रहे अन्वययोग्या-

---

१ दधिहोमं करोतीत्यर्थः । २ पदानामित्यनेन नाममात्रस्य वाक्यस्य च न समास इति सूचयति ।

र्थसमर्थकः पदसमुदायो विग्रहो वाक्यमिति याव-त्। स्वपदैरन्यपदैर्वा विविच्य कथनं विग्रहः। कृते ❀ समासे अव्ययस्य पूर्वनिपातो वक्तव्यः ❀॥१॥

[पूर्वेऽव्ययेऽव्ययीभावः २]--अव्यये पूर्वपदे सति-योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति ॥ २॥

इति समाससंज्ञायां सत्यां।

[समासप्रत्यययोः ३]—समासे वर्तमानाया विभक्तेः प्रत्यये च परे लुग् भवति। इत्यमो लुक्। निमित्ताभावे नैमिकस्याप्यभावः। नामसंज्ञायां स्यादिर्विभक्तिः। अधि स्त्री सि इति स्थिते ॥ ३ ॥

[स नपुंसकं ४]—सोऽव्ययीभावो नपुंसकलिं-गो भवति। नपुंसकत्वाद् ह्रस्वत्वम् ॥ ४ ॥

[अव्ययीभावात् ५]—अव्ययीभावात्परस्या-विभक्तेर्लुग् भवति। अधिस्त्रि गृहकार्यं, रायमतिक्रां-

---

१ तत्रतल्लक्षणं वाक्यपदीये "साकक्षांवायवं भेद परानाकांक्षशब्दक-म्। कर्म्मप्रधाने गुणवदेकार्थं वाक्यमुच्यते"। २ अव्ययाद्विभक्तेर्लुगित्यतो लुगित्यनुवर्तनीयम्। ३ स्त्रियमधि कृत्य भवतीति विग्रहे।

तमतिरि कुलम् । नावमतिक्रान्तमतिनु जलम् ।
❋ह्रस्वादेशे सन्ध्यक्षराणामिकारोकारौचवक्तव्यौ❋
योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः।
रूपस्य योग्यं अनुरूपं । पदार्थान् व्याप्तुमिच्छा
वीप्सा । विष्णुं विष्णुं प्रति प्रतिविष्णु । सादृश्ये
तु यथा हरिस्तथा हरः ॥ ५ ॥

[यथाऽसादृश्ये ६]—यथाशब्दः असादृश्ये वर्त्तमानः समस्यते शक्तिमनतिक्रम्य करोतीति यथाशक्ति ॥ ६ ॥

[अतोमनतः ७]—अकारान्तादव्ययीभावात्परस्या विभक्तेरम् भवति अतं वर्ज्जयित्वा । कुम्भस्य समीपं उपकुम्भं वर्त्तते । उपकुम्भं पश्य । उपकुम्भादानय । अनत इति विशेषणात्पंचम्यां अम् न भवति ॥ ७ ॥

---

१ उपकुम्भाज्जलमुपाददातीत्यादिप्रयोगोपपात्तिः ।

[वा टाङ्योः ८]—टा ङि इत्येतयोर्वा अम् भवति। उपकुम्भेन कृतं उपकुम्भकृतं। उपकुम्भं निधेहि उपकुम्भे निधेहि ॥ ८ ॥

[अवधारणार्थे यावति च ९]—अवधारणार्थे यावच्छब्दे पूर्वपदे सति अव्ययीभावसंज्ञकः समासो भवति। यावंत्यमन्त्राणि संभवंति तावंतो ब्राह्मणान्निमन्त्रयस्वेति यावदमंत्रं। मक्षिकाणामभावो निर्मक्षिकं वर्तते ॥ ९ ॥

॥ इत्यव्ययीभावः ॥

[अमादौ तत्पुरुषः १]—द्वितीयाद्यन्ते पूर्वपदे सति योऽन्वयस्स तत्पुरुषसंज्ञकः समासो भवति। ग्रामं प्राप्तो ग्रामप्राप्तः। दात्रेण छिन्नं दात्रछिन्नं। यूपाय दारु यूपदारु। वृकेभ्यो भयं वृकभयं। राज्ञः पुरुषो राजपुरुषः। अक्षेषु शौण्डः अक्षशौण्डः। क्वचिदमाद्यन्तस्य परत्वं। अग्नौ आहितः आहिताग्निः। पूर्वं भूतो भूतपूर्वः। समासे क्वचिदैकपद्यं णत्वहेतुः।

शराणां वनं शरवणं । आम्राणां वनं आम्रवणं । पानस्य वा । सुरापानं सुरापाणम् ॥ १ ॥

[नञि २]–नञि पूर्वपदे सति योऽन्वयः स तत्पुरुषसंज्ञकः समासो भवति ॥ नब्राह्मणः अब्राह्मणः ॥ २ ॥

[नो[1] ३]–समासे सति नञोऽकारादेशो भवति ॥ ३ ॥

[नाकादिवर्ज्यं ४]–नाकं । नपुंसकं ॥ ४ ॥

[अन् स्वरे ५]–समासे सति नञोऽनादेशो भवति स्वरे परे । अश्वादन्योऽनश्वः । धर्माद्विरुद्धोऽधर्म्मः ग्रहणानामभावोऽग्रहणमित्यादि । तदन्यत्तद्विरुद्धतदभावेषु नञ् वर्तते ॥ ५ ॥

॥ इति तत्पुरुषः ॥

[चार्थे द्वन्द्वः १]–समुच्चयाऽन्वाचयेतरेतरयोगसमाहाराश्चार्थाः । तत्रेश्वरं गुरुं च भजस्वेति प्रत्ये-

---

१ अत्रनकाराकारयोर्लुप्तषष्ठीद्विवचनान्तो निर्देशः ।

कर्मैकक्रियाभिसम्बन्धे समुच्चये समासो नास्ति। बटो भिक्षामट गांचानयेति क्रमेण क्रियाद्वयसम्बन्धे अन्वाचयेच समासो नास्ति परस्परमसम्बन्धात्। इतरेतरयोगे समाहारेचार्थे द्वन्द्वः समासो भवति।

❀ द्वन्द्वेऽल्पस्वरप्रधाने इकारोकारान्तानां पूर्वनिपातो वक्तव्यः ❀

अग्निश्च मारुतश्च अग्निमारुतौ। पटुश्च गुप्तश्च पटुगुप्तौ॥

[उक्तार्थानामप्रयोगः २]—स्त्री च पुरुषश्च स्त्रीपुरुषौ। भोक्ता च भोग्यश्चभोक्तृभोग्यौ। धवश्च खदिरश्च धवखदिरौ।

❀ देवताद्वन्द्वे[1] पूर्वपदस्य दीर्घो वक्तव्यः ❀

अग्निश्च सोमश्च अग्नीषोमौ। इन्द्रश्च बृहस्पतिश्च इन्द्राबृहस्पती।

❀ अग्न्यादेः[2] सोमादीनां षत्वं वक्तव्यं ❀

---

१ देवतावाचिनि द्वन्द्वसमासे आदिपदस्य दीर्घःस्यात्। २ अग्न्यादेरिति पंचम्यंतम्।

इतरेतरयोगे द्विवचनं । अग्नीषोमौ ।

❀ एकवद्भावो वा समाहारे वक्तव्यः ❀

शशाश्च कुशाश्च पलाशाश्च शशकुशपलाशाः ॥ तेषां समाहारे शशकुशपलाशम् ॥ २ ॥

[स नपुंसकम् ३]—यस्यैकवद्भाव[1]: स नपुंसकं भवति ।

❀ अन्यादीनां विभक्तिलोपे कृते पूर्वस्य सगागमो वक्तव्यः ❀

अन्यश्च अन्यश्च अन्योन्यं । परश्च परश्च परस्परम् ॥

॥ इति द्वन्द्वः ॥

[एकत्वे द्विगुद्वन्द्वौ १]— एकत्वे वर्तमानौ द्विगुद्वन्द्वौ नपुंसकलिंगौ भवतः ॥ १ ॥

[संख्यापूर्वो द्विगुः २]—संख्यापूर्वः समासो द्विगुर्निगद्यते ॥ २ ॥

[समाहारेऽतद्दीपदिद्विगुः ३]—समाहारेऽर्थे द्विगुः

१ यच्छब्दसंबन्धी एकवद्भाव ऐक्यामितियावत् ।

समासो भवति ततोऽकारान्तादीप् प्रत्ययो भवति। दशानां ग्रामाणां समाहारो दशग्रामी। आकारान्तो द्विगुः स्त्रियां भाष्यते। पञ्चाग्नय॰ समाहृता इति पञ्चाग्नि। पञ्चानां गवां समाहारः पञ्चगु। नपुंसकत्वाद्ध्रस्वत्वम्। त्रिफलेति रूढिः॥ ३॥

* पात्रादीनामीप्प्रतिषेधो वक्तव्यः *

पञ्चपात्रम्। त्रिभुवनम्।

॥ इति द्विगुः॥

[बहुव्रीहिरन्यार्थे १]–अन्यपदार्थे प्रधानो यः समासः स बहुव्रीहिसंज्ञकः समासो भवति। बहु धनं यस्य स बहुधनः। अस्ति धनं यस्य स अस्तिधनः। यस्य प्रधानस्यैकदेशे विशेषणतया यत् प्रतिज्ञायते स तद्गुण संविज्ञानो बहुव्रीहिः। यथा लम्बौ कर्णौ यस्य स लम्बकर्णः।

बहुव्रीहौ विशेषणसप्तम्यन्तयोः पूर्वनिपातो वक्तव्यः।

---

१ पंच ते अग्नयश्चेति समासः। २ रूढिर्योगापहारिणीत्याभियुक्तोक्तिः।

कण्ठे कालो यस्यासौ कण्ठकालः । करे धनं यस्य स करधनः ॥ १ ॥

[नेन्द्वादिभ्यः[1] २]—सप्तम्यन्तस्य पूर्वनिपातो न भवति । इन्दुशेखरः चक्रपाणिः । पद्मनाभः । कपिध्वजः ॥ २ ॥

[प्रजामेधयोरसुक् ३]—सुप्रजाः दुर्मेधाः अत्वसोः सौ ॥ ३ ॥

[धर्मादन् ४]—सुधर्मा ॥ ४ ॥

[अन्यार्थे ५]—स्त्रीलिङ्गस्यान्यार्थे वर्तमानस्य ह्रस्वो भवति ॥ ५ ॥

[पुंवद्वा ६]—समासे सति समानाधिकरणे पूर्वस्य स्त्री शब्दस्य पुंवद्भावो वा भवति । पुंवद्भावादीपो निवृत्तिः । रूपवती भार्या यस्य स रूपवद्भार्यः । वाग्रहणात् कल्याणीप्रिय इत्यादौ न भवति ॥ ६ ॥

[गोः ७]—गोशब्दस्यान्यार्थे वर्तमानस्य ह्रस्वो

---

१ इंदुः आदिर्येषां तेभ्य इत्यर्थः ।

भवैति। पञ्च गावो यस्य स पञ्चगुः।

❋ संख्यासु व्याघ्रादिपूर्वस्य पाद-
शब्दस्यालोपोवक्तव्यः ❋

सहस्रं पादा यस्य स सहस्रपात्। शोभनौ पादौ यस्य स सुपात्। व्याघ्रस्य पादाविव पादौ यस्य स व्याघ्रपात्। द्वौ पादौ यस्य स द्विपात्। द्विपादौ द्विपादः। द्विपादं द्विपादौ। शसादौ स्वरे परे पदादेशश्चक्तव्यः। दिपदः द्विपदा द्विपाद्भ्यां द्विपाद्भिः इत्यादि ॥७॥

[टाडकाः८]—समासे सति ट अ ड क इत्येते प्रत्यया भवन्ति। टकारस्तत्पुरुषे च अकारो द्वन्द्व एव च। डकारश्च बहुव्रीहौ ककारोऽनियमो मतः॥ ८ ॥

[नोवा ९]नान्तस्य पदस्य टेर्लोपो वा भवति यकारे स्वरे परे। वाग्रहणात् क्वचिन्न भवत्युपधालोपश्च। अह्नो मध्यं मध्याह्नः। कवीनां राजा कविराजः। टकारोनुबन्ध ईवर्थः। कविराजी। राज्ञां पूः राजपुरं।

---

१ व्याघ्र आदिर्यस्य स व्याघ्रादिः स पूर्वो यस्य तस्य। २ टश्च अश्च डश्च कश्च एतेषां समाहारः "टाडकाः"।

वाक् च मनश्च वाङ्मनसं। दक्षिणस्यां दिशि पन्थाः दक्षिणापथः । अहश्च रात्रिश्च अहोरात्रं। द्वौ च त्रयश्च परिमाणं येषां ते द्वित्राः। पञ्च च षट् च परिमाणं येषां ते पञ्चषाः। बहवो राजानो यस्यां नगर्यां सा बहुराजा नगरी। अत्र टिलोपे कृते आबतः स्त्रियाम् इत्याप्। बहवः कर्त्तारो यस्य स बहुकर्तृकः ९

[कर्म्मधारयस्तुल्यार्थे १०]—पदद्वये तुल्यार्थे एकार्थनिष्ठत्वे सति कर्म्मधारयः समासो भवति। नीलं च तदुत्पलं च नीलोत्पलम्। रक्ता चासौ लता च रक्तलता। पुमांश्चासौ कोकिलश्चेति पुंस्कोकिलः १०

❋ पुंसः खपे संयोगान्तालोपो वक्तव्यः ❋

[नाम्नश्च कृता समासः ११]—प्रादेरुपसर्गस्य नाम्नश्च कृदन्तेन समासस्तत्पुरुषो भवति । प्रकृष्टो वादः प्रवादः। कुम्भं करोतीति कुम्भकारः ॥११॥

[सहादेः सादिः १२]—समासे सति सहादीनां सादिर्भवति। पुत्रेण सह वर्त्तत इति सपुत्रः। सहस-

न्तरसां साध्रिसमितिरयः। सह अञ्चतीति सध्र्यङ्। सम् अञ्चतीति सम्यङ्। तिर अञ्चतीति तिर्य्यङ्१२

[कोः कदादिः १३]–कुशब्दस्य कुत्सितेषदर्थयोस्तत्पुरुषे कत् कव का आदेशा भवंति॥ कुत्सितं अन्नं कदन्नं। ईषदर्थे ईषदुष्णं कवोष्णं॥ १३॥

[कोर्म्मंदादेशश्च[1] १४]–मन्दोष्णं॥ १४॥

[रथवदयोश्च १५]–कद्रथः। कद्वदः॥ १५॥

[पुरुषे वा १६]–कुपुरुषः कापुरुषः॥ १६॥

[पथ्यक्षयो[2]ः १७]–कोः कादेशः स्यात्। कुपथः कापथः। कुअक्षः काक्षः॥ १७॥

[ईषदर्थे च १८]–ईषज्जलं काजलं। षड्भिराधिका दश षोडश। षट् दन्ता यस्य स षोडन्। षष दन्त इति स्थिते॥ दन्तस्य दतृ[3]। ऋ इत् षस्य उत्वं दस्य डः। त्रितोनुम्। षोडन् षट् प्रकाराः षोढा। संख्यायाःप्रकारेधा॥ १८॥

---

१ चकारात्कदादयोपि। २ सूत्रवत् भ्रान्तचित्तैः प्रक्षिप्तम्। ३ निपातत्वात्

❋ धस्य ढः षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च भवतीति वक्तव्यम् ❋

[बृहच्छब्दस्यसुडागमे तलोपश्च १९]–बृहतां पतिः बृहस्पतिः ॥ १९ ॥

[महच्छब्दस्य टेराकारः समानाधिकरणे २०] –महादेवः महेश्वरः। द्यौश्चभूमिश्च द्यावाभूमी। द्योशब्दस्य द्यावादेशः। जायायाः जम्भावो दंभावो निपात्यते। दम्पती जम्पती। क्वचिज्जायापती। आकृतिगणोयं ॥ २० ॥

[अलुक् क्वचित् २१]–क्वचित्समासे कृदन्तेत द्धितेपि विभक्तेरलुग् भवति कृच्छान्मुक्तः। अप्सु योनिरस्येत्यप्सुयोनिः। उरसि लोम यस्यासौ उरसि-लोमा। हृदि स्पृशतीति हृदिस्पृक्। कण्ठे कालो य-स्यासौ कण्ठेकालः। वाचोयुक्तिः। दिशोदण्डः। प-

१ दतृदशधासु पूर्वपदेषु सत्सु।

श्यतोहरः । वनेचरः । खेचरः । ❋ समानाधिकरणे[1] शाकपार्थिवादीनां मध्यमपदलोपो वक्तव्यः ❋ शाकः प्रियः यस्य सः शाकप्रियः शाकप्रियश्चासौ पार्थिवश्च शाकपार्थिवः ॥ २१ ॥

[आदेश्च द्वन्द्वे २२]–द्वंद्वे समासे पूर्वपदस्य लोपो भवति । चकारग्रहणात् विकल्पेन । माता च पिता च पितरौ । शिष्यमाणो लुप्यमानार्थाभिधायी । श्वश्रूश्च श्वशुरश्च श्वशुरौ । दुहिता च पुत्रश्च पुत्रौ ॥ २२ ॥

[ऋतां[2] द्वन्द्वे २३]–द्वन्द्वे समासे पूर्वपदस्य ऋकारस्य वा आकारो भवति । माता च पिता च मातापितरौ ॥ २३ ॥

[द्वन्द्वेसर्वादित्वं वा २४]–द्वन्द्वे समासे सर्वादित्वं वा भवति । वर्णाश्च आश्रमाश्च इतरे च वर्ण-

---

१ समानं अधिकरणं यस्य तत्समानाधिकरणं तास्मिन् ।
२ ऋकारान्तानां द्वन्द्वसमासे आत्वं वा वाच्यमित्यर्थः ।

मितरे वर्णाश्रमेतराः । * वैयधिकरण्ये बहुव्रीहौ ध्यमपदलोपो वक्तव्यः * कुमुदस्य गन्धइव गन्धो यस्य स कुमुदगंधिः॥२४॥

[उपमानाच्च २५]–उपमानात्परस्य गन्धशब्दस्याकारो भवति । हंसस्य गमनमिव गमनं यस्याः सा हंसगमना ॥ २५ ॥

[दिक्सङ्ख्ये[1] संज्ञायाम् २६]–दिग्वाचकसंख्यावाचकशब्दौ संज्ञायां विषये परपदतुल्यार्थे समस्येते स समासस्तत्पुरुषो भवति। अविग्रहो[2] नित्यसमासः।अन्यस्त्वस्वपदविग्रहोपि। दक्षिणाग्निः सप्तग्रामः।

॥ इति समासप्रक्रिया ॥

अथ तद्धितो[3] निरूप्यते ।

[अपत्येऽण् १]–नाम्नोऽपत्येऽर्थे अण् प्रत्ययो

---

१ दिक् च संख्या च संज्ञायामेव समस्येते नान्यत्र इति वक्तव्यम् ।

२ नास्ति विग्रहो वाक्यं यत्र स नित्यसमास इत्यर्थः ।

३ वक्ष्यमाणो यः प्रत्ययराशिस्तद्धितसंज्ञः स च निरूप्यते इत्यर्थः । अथवा पूर्वाचार्यसंज्ञाचेयं स च तद्धितो द्विविधः प्रकृत्यर्थाभिन्नः स्वार्थिकश्च तत्र । आद्यंनिरूपयाति ।

भवति । उपगोरपत्यमिति वाक्ये उपगो अण् इति स्थिते समासप्रत्यययोरिति षष्ठीलोपः । णकारो वृद्ध्यर्थः ॥ १ ॥

[आदिस्वरस्य ञ्णिति च वृद्धिः २]–स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिर्भवति ञ्णिति ताद्धिते परतः । उकारस्य औकारो वृद्धिः ॥ २ ॥

[वोऽयस्वरे ३]–उकारस्यौकारस्य च अव् भवति यकारे स्वरे च परे। औपगवः । वासिष्ठः गौतमः। ❋ शिवादिभ्यश्चेति वक्तव्यः ❋ शैवः वैदेहः ॥३॥

[ऋ उरणि ४]–ऋकारस्य उर् भवति अणिपरे ४

[षषो णो मातरि ५]–षाण्मातुरः । द्वयोर्मात्रोरपत्यं द्वैमातुरः ॥ ५ ॥

[अत इञनृषेः ६]-अकारान्तात् नाम्नोऽनृषिशब्दादपत्येर्थे इञ् प्रत्ययो भवति । यस्य लोपः । देव-

१ चकारादत्राप्यण् भवति इति ज्ञेयम् ।

दत्तस्यापत्यं दैवदत्तिः । श्रीधरस्यापत्यं श्रैधरिः । दशरथस्यापत्यं दाशरथिः। पुरन्दरस्यापत्यंपौरन्दरिः

[बह्वादिभ्यश्च ७]--औपगविः कार्ष्णिः औडुलोमिः आग्निशर्मिः ॥ ७ ॥

[ण्यायनणेयणूणीयागर्गनडात्रिस्त्रीपितृष्वस्रादेश्च ८] –गर्गादेर्नडादेरत्र्यादेः स्त्रीलिङ्गात् पितृष्वस्रादेश्च ण्यआयनण् एयण् णीय इत्येते प्रत्यया भवन्ति अपत्येर्थे । गर्गस्यापत्यं गार्ग्यः, वत्सस्यापत्यं वात्स्यः, नडस्यापत्यं नाडायनः । चरस्यापत्यं चारायणः । अत्रेरपत्यं आत्रेयः । गांगेयः मह्या अपत्यं माहेयः । कपेरपत्यं कापेयः । पैतृष्वस्रीयः ॥ ८ ॥

[अलुक् क्वचित् ९]–अमुष्य अपत्यं आमुष्यायणः । ❋ मातृपितृभ्यां स्वसुः सस्य षत्वं वक्तव्यं❋ मातृष्वस्रीयः ॥ ९ ॥

---

१ कथं तर्हि प्रदीयतां दाशरथाय मैथिलीत्युच्यते इह योगविभागः कर्तव्यः तत्र चाणनुवर्तते ततश्चायमर्थः “ अतः ” अकारान्तादण् प्रत्ययो भवति ततो नास्ति कुत्राचिदपि बाधः ।

[पितृमातृभ्यां व्यडुलौ १०]—पितुर्भ्राता पितृव्यः मातुर्भ्राता मातुलः ॥ १० ॥

[पितुर्डामहन् ११]—पितुःपिता पितामहः । पितुर्माता पितामही ॥ ११ ॥

[लुग्बहुत्वेक्वचित् १२]—अपत्येर्थे उत्पन्नस्य प्रत्ययस्य बहुत्वे सति क्वचिदृष्यनृषिविषये लुग् भवति । गर्गाः वसिष्ठाः अत्रयः विदेहाः ॥ १२ ॥

[देवतेदमर्थे १३]—देवतार्थे इदमर्थे चोक्ताः प्रत्यया भवन्ति । इन्द्रोदेवता अस्येति ऐन्द्रं हविः । सोमो देवता अस्येति सौम्यं । देवदत्तस्य इदं दैवदत्तं वस्त्रम् ॥ १३ ॥

[क्वचिद्द्वयोः १४]—पूर्वपदोत्तरपदाद्योः क्वचिद्वृद्धिर्भवति । अग्निमरुतौ देवते अस्येति आग्निमारुतं कर्म । सुहृदो भावः सौहार्दं ॥ १४ ॥

❋ अत्र भावे अण् वक्तव्यः ❋

[णितो वा १५]— उक्ताः प्रत्यया विषयान्तरे-

ऽपि णितो वा भवंति । अजो गौर्यस्य सः अजगुस्त स्येदं धनुः आजगवं अजगवं वा । कुमुदस्य गन्ध इव गन्धो यस्य स कुमुदगंधिः तस्यापत्यं स्त्रीकौमुदगन्ध्या । श्वशुरस्यायं श्वाशुर्योग्रामः । विष्णोरिदं वैष्णवं । गोरिदं गव्यम् । कुलस्य इदं कुल्यम् ॥१५॥

[त्वन्मदेकत्वे १६]—तव इदं त्वदीयं मम इदं मदीयं ॥ २६ ॥

[चतुरश्च लोपः १७]—चतुर्शब्दस्य चकारस्य लोपो भवति ण्यणीययोः परतः । तुर्य्यः तुरीयः १७

[अन्यस्यदक् १८]—अन्यशब्दस्य दगागमो भवति णीयप्रत्यये परे अन्यस्य इदं अन्यदीयं । अर्द्धजरत्या इदं अर्द्धजरतीयं ॥ १८ ॥

[कारकात्क्रियायुक्ते १९]—कारकादप्येतेप्रत्यया भवंति क्रियायुक्ते कर्तरिकर्माणि चाभिधेये ।

कुंकुमेन रक्तं वस्त्रं कौङ्कुमम् । मथुरायाः आगतो माथुरः ग्रामे भवः ग्राम्यः । धुरं वहतीति धुर्यः धौरेयः ॥ १९ ॥

[केनेयेकाः २०]—क इन इय इक इत्येते प्रत्यया भवन्तिभवाद्यर्थेषु । णित्वं चैषां वैकल्पिकं । कर्णाटे भवः कार्णाटकः कर्णाटकोवा । ग्रामादागतस्तत्र जातो वा ग्रामीणः ग्राम्यः । सध्रीचिभवः सध्रीचीनः । समीचि भवः समीचीनः । तिरश्चि भवः तिरश्चीनः ॥ ३० ॥

[यलोपश्च २१] क्वचिद्यकारलोपो भवति । कन्यायाः जातः कानीनः ।

❁ नक्षत्रादण् वक्तव्यः ❁

पुष्येण युक्ता पौर्णमासी पौषी । पौष्यां भवः पौषीणः ॥ २१ ॥

[इयो वा २२]--क्षतात् त्रायतइति क्षत्रं क्षत्रेभवः क्षत्रियः क्षात्रः । शुक्राज्जातं शुक्रियं । इन्द्राज्जातं

इंद्रियं । अक्षैर्दीव्यतीति आक्षिकः । शब्दं करोतीति शाब्दिकः । तर्कं करोतीति तार्किकः । वेदे जाता वैदिकी स्तुतिः ऋग्वा ॥ २२ ॥

[किमादेस्त्यतनौ २३]—किमादेरद्यादेर्भवाद्यर्थेषु त्यतनौ प्रत्ययौ भवतः । कुत्र भवः कुत्रत्यः । कुतस्त्यः । अद्य भवः अद्यतनः । ह्यो भवः ह्यस्तनः । श्वोभवः श्वस्तनः । सदाभवः सदातनः ।

❀ दक्षिणापश्चात्पुरसस्त्यण् वक्तव्यः ❀ दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ॥ २३ ॥

[स्वार्थेपि २४]—उक्ताः प्रत्ययाः स्वार्थेपि भवन्ति । देवदत्त एव दैवदत्तकः । चत्वार एव वर्णाः चातुर्वर्ण्यं । चोर एव चौरः । भागरूपनामभ्यो धेयः स्वार्थेपि । भागधेयः रूपधेयः नामधेयः ॥ २४ ॥

[अणीनयोर्युष्मदस्मदोस्तवकादिः २५]—अणीनयोर्युष्मदोस्तवकादयः आदेशा भवन्ति । तव इदं तावकं । मम इदं मामकं । तावकीनः । मामकीनः

यौष्माकः । आस्माकः । यौष्माकीनः । आस्माकीनः ॥ २५ ॥

[वत्तुल्ये २६] तुल्ये साहश्येऽर्थे वत् प्रत्ययो भवति । चन्द्रेण तुल्यं चन्द्रवत् मुखं । घटेन तुल्यं घटवत् उदरम् । टपवत् कम्बलम् ॥ २६ ॥

[भावे तत्वयणः २७]--शब्दस्य प्रवृत्तिनिमित्तं भावस्तस्मिन् भावे त-त्व-यण् इत्येते प्रत्यया भवन्ति । ब्राह्मणस्य भावो ब्राह्मणता । त्वयणौ नंपुसकलिंगौ भवतः । ब्राह्मणत्वं ब्राह्मण्यं । सुमनसो भावः सौमनस्यं । सुभगस्य भावः सौभाग्यं । विदुषो भावः । वैदुष्यं ॥ २७ ॥

[समाहारे ताच गुणः २८] त्रयाणां समाहारः त्रेता । जनानां समूहो जनता देवता ।

❀ कर्म्मण्यपि यण् वक्तव्यः ❀

ब्राह्मणस्य कर्म्म ब्राह्मण्यं । राज्ञः इदं कर्म्म राजन्यं ।

[लोहितादेर्डिमन् २९] लोहितादेर्भावेऽर्थेडिमन्

प्रत्ययो भवति सच डित् । डित्त्वाट्टिलोपः । लोहितिमा । अणोर्भावः अणिमा । लघोर्भावो लघिमा । महतोभावो महिमा ॥ २९ ॥

[ऋ र इमनि ३०]--ऋकारस्य रेफो भवति इमनिपरे । प्रथिमा । द्रढिमा । बहोर्भाव इति विग्रहे ३०

[बहोर्लोपो भूश्च बहोः ३१]—बहोरुत्तरेषामिमनादीनामिकारस्य लोपो भवति । बहोः स्थाने भूश्चादेशः । बहोर्भावो भूमा ॥ ३१ ॥

[अस्त्यर्थेमतुः ३२]—नाम्नो मतुप्रत्ययो भवति। अस्यास्मिन्नस्तीत्येतस्मिन्नर्थे । उकारो नुमविधानार्थः । त्रितो नुम गोमान् । श्रीमान् । गोमती । श्रीमती । आयुष्मान् ॥ ३२ ॥

[अइकौ च मत्वर्थे ३३]—मत्वर्थे अइकौ प्रत्ययौ भवतः । वैजयन्ती पताका अस्य अस्मिन् वा वैजयन्तः प्रासादः । माया विद्यते अस्यास्मिन्वा मायिकः ॥ ३३ ॥

[मान्तोपधाद्ददित्विनौ ३४]—मकारान्तान्मकारोपधादकारांतादिकारोपधाच्च वत्विनौ प्रत्ययौ भवतः अस्त्यर्थे । किंवान् लक्ष्मीवान भगवान् । धनी दण्डी छत्री । दृषद्वती भूमिः शमी । कामी ॥ ३४ ॥

[तडिदादिभ्यश्च ३५]—तडित्वान् विद्युत्वान् मरुत्वान् ॥ ३५ ॥

[एतत्किंयत्तद्भ्यःपरिमाणेवतुः ३६ यत्तदोरा ३७]—यत्तदोष्टेरात्वं भवति वतौ परे ॥ ३६ ॥ ३७ ॥

[किमः किर्य्यश्च ३८]—किम्शब्दस्यकिरादेशो भवति वतौ परे । चकारान्मस्य वकारस्य यकारो भवति । कियान् ॥ ३८ ॥

[आइश्चैतदोवा ३९]—वतुप्रत्यये परे एतत्शब्दस्य आइश् इत्येतावादेशौ भवतः । गुरुः शिच्चेति शित्वात्कृत्स्नस्य आ इति गुरुस्तथापि चकारादन्तस्तस्यैव टेकारादेशो भवति न कृत्स्नस्य । यस्मिन् पक्षे आइशादेशस्तास्मिन् पक्षे प्रत्ययस्य वकारस्य यकारादेशो भवति । एतावान् इयान् ॥ ३९ ॥

[तुन्दादेरिलः ४०]—तुन्दादेरिलप्रत्ययो भवति अस्त्यर्थे । तुन्दमस्यास्तीति तुंदिलः ॥ ४० ॥

[औन्नत्येदन्तादुरः ४१]—उन्नता दन्ता यस्य सः दन्तुरः ॥ ४१ ॥

[श्रद्धादेर्लुः ४२]—श्रद्धादेर्गणाल्लुप्रत्ययो भवति। श्रद्धाअस्यास्तीति श्रद्धालुः । दयालुः । कृपालुः । अस्मायामेधास्रग्भ्योऽस्त्यर्थे विनिर्वक्तव्यः । तपोऽस्यास्तीति तपस्वी । मायावी । मेधावी । स्रग्वी ४२

[वाचो ग्मिनिः ४३]—वाग्मी ॥ ४३ ॥

[आलाटौ कुत्सितभाषिणि ४४]—वाचालः । वाचाटः ॥ ४४ ॥

[ईषत्समाप्तौकल्पदेश्यदेशीयाः ४५]—ईषत् परिसमाप्तः सर्वज्ञः सर्वज्ञकल्पः । पटुदेश्यः कविदेशीयः ॥ ४५ ॥

[प्रशंसायां रूप्यः ४६] प्रशस्तो वैयाकरणो वैयाकरणरूप्यः ॥ ४६ ॥

[भूतपूर्वे चरट् ४७] दृष्टचरः । दृष्टचरी ॥४७॥

[प्राचुर्यविकारप्राधान्यादिषु मयट् ४८] अन्नं प्रचुरं यस्मिन् सः अन्नमयोयज्ञः । मृन्मयो घटः । स्त्रीमयो जाल्मः । अमृतमयश्चन्द्रः । ❀ तदधीते वेत्त्यत्राण् वक्तव्यः ❀ व्याकरणमधीते वेद वा वैयाकरणः । शोभनः अश्वः तं वेदेति सौवश्वः ॥ ४८ ॥

[न सन्धिय्वोर्युट् च ४९] सन्धिजौ य्वौ सन्धिय्वौ तयोः सन्धिजयोर्यकारवकारयोः संबन्धिनः स्वरस्य वृद्धिर्न भवति किन्तु तयोर्युडागमो भवति इट् उट् इत्येतावागमौ भवतः । वर्णविश्लेषं कृत्वा यकारात्पूर्वमिकारः वकारात्पूर्वमुकारः । स्वरहीनं परेण संयोज्यं । आदि स्वरस्य ञ्णिति च वृद्धिः । वैयाकरणः सौवश्वः ॥ ४९ ॥

[इतो जातार्थे ५०] लज्जितः । पण्डितः । तृषितः ५०

[तरतमेयास्विष्ठाः प्रकर्षे ५१]—अतिशयेऽर्थे तरतम इयसु इष्ठ इत्येते प्रत्यया भवन्ति । अतिशयेन कृ-

ष्णः कृष्णतरः । अतिशयेन शुक्लः शुक्लतमः । ❀ ईयस्विष्ठौ डिताविति वक्तव्यौ ❀ उकारो नुम्विधानार्थः । नृसम्महत इति दीर्घः । अतिशयेन लघुः लघीयान् । अतिशयेन पापः पापिष्ठः पापीयान् पापीयसी । लघिष्ठः लघीयान् लघीयसी ॥ ५१ ॥

[गुर्वादेरिष्ठेमनीयस्सुगरादिष्टिलोपश्च ५२]—गुरु प्रिय स्थिर स्फिर उरु बहुल वृद्ध दीर्घ प्रशस्य बाढ युवन् अल्प स्थूल दूर अन्तिकानां क्रमेण गर प्रस्थ स्फ वर् बंहि ज्या द्राघ श्र साध यव कन स्थ वद् व नेद एते आदेशा भवन्ति । अतिशयेन गुरुः गरीयान् गरिष्ठः गुरोर्भावो गरिमा । अतिशयेन प्रियः प्रेयान् प्रेष्ठः प्रेमा । अतिशयेन स्थिरः स्थेयान् स्थेष्ठः स्थेमा । अतिशयेन उरुः वरीयान् वरिष्ठः । अतिशयेन स्फिरः स्फेयान् । अतिशयेन बहुलः बंहीयान् । अतिशयेन वृद्धः । इलोपो ज्या शब्दादीयसः । ज्यायान् ज्येष्ठः । अतिशयेन दीर्घः द्राघीयान्

द्राधिष्ठः द्राघीयसी द्राघिमा । प्रशस्यस्य श्रादेशः इष्ठस्येकारस्य यिर्भवति श्रेष्ठः । अतिशयेन बहुः भूयिष्ठः । ईयसइलोपः । भूयान् भूयसी । दूरस्य दवादेशः दविष्ठः दवीयान् दवीयसी । क्षिप्रशब्दस्य क्षेपादेशः । क्षेपिष्ठः क्षेपीयान् । क्षुद्रशब्दस्य क्षोदादेशः । क्षोदीयान् ॥ ५२ ॥

[बहोरिष्ठेर्यिः ५३]—बहोत्तरस्येष्ठप्रत्ययस्येकारस्य यिर्भवति । बहोः स्थाने भूश्चादेशः । भूमा भूयिष्ठः । ❋ किमोव्ययादाख्याताच्च तरतमयोराम्वक्तव्यः ❋कुतस्तरां परमाणवः कुतस्तेषामारम्भकत्वम् । उच्चैस्तरां गायति । पठतिमां पचतितमां ॥५३॥

[अव्ययसर्वनाम्नामकच्प्राक्टेः ५४]—उच्चकैः । यकः । सकः । सर्वकः ॥ ५४ ॥

[परिमाणे दघ्नादयः ५५]—पणिमाणेर्थे दघ्नट् द्वयसट् मात्रट् इत्येते प्रत्यया भवन्ति । जानुदघ्नं जलं शिरोद्वयसं । पुरुषमात्रम् ।

❀ द्वयोर्बहूनां चैकस्य निर्द्धारणे किमादिभ्यो इतरडतमौ वक्तव्यौ ❀

कतरो भवतां काण्वः कतमो भवतां तांत्रिकः। भवतोर्यतरस्तार्किकस्ततर उद्गृणातु ॥ ५५ ॥

[संख्येयविशेषावधारणे द्वित्रिभ्यांतीयः ५६]-द्वयोः संख्यापूरकः द्वितीयः। त्रयाणां संख्यापूरकः तृतीयः। त्रेः सम्प्रसारणम् ॥ ५६ ॥

[षट्चतुरोस्थट् ५७-षष्ठः चतुर्थः ॥ ५७॥

[पंचादेर्मट् ५८]- पञ्चमः। सप्तमः। अष्टमः। नवमः ॥ ५८ ॥

[विंशत्यादेर्वा तमट् ५९] विंशतितमः विंशतिः५९

[विंशतेस्तिलोपो डिति ६०]-विशः त्रिंशत्तमः॥६०॥

[शतादेर्नित्यं ६१] -शततमः ॥ ६१ ॥

[एकादशादेडच् ६२]-एकादशः। द्वित्र्यष्टानां द्वात्रयोष्टाः। द्वादशः त्रयोदशःअष्टादशः॥६२॥

[कतिकतिपयाभ्यां थः ६३]-कतिथः। कतिपयथः ॥ ६३ ॥

[संख्यायाः प्रकारे धा ६४]–द्विप्रकारे द्विधा-चतुर्धा । गुणो अणूच । द्वेधा त्रेधा । णित्वात् वृद्धिः । यस्य लोपः अतोम् । द्वैधम् त्रैधम् ॥ ६४ ॥

[क्रियाया आवृत्तौ कृत्वसू ६५]–पञ्चकृत्वः सप्तकृत्वः ॥ ६५ ॥

[द्वित्रिभ्यां सुः ६६]–द्विः त्रिरुक्तम् ॥ ६६ ॥

[बह्वादेः शसू ६७] बहुशः शतशः ॥ ६७ ॥

[तयायटौ संख्यायां ६८]–द्वितयं त्रितयं द्वयं त्रयं ॥ ६८ ॥

[शेषा निपाताः कत्यादयः ६९]–का संख्या येषां ते कति ॥ ६९ ॥

॥ इति तद्धितप्रक्रिया समाप्ता ॥

॥ इति सारस्वते पूर्वार्द्धं संपूर्णम् ॥

पं० श्रीधरात्मज कृष्णलालशर्मा 'ज्ञानसागर'
प्रेसाध्यक्ष. मु०–श्रीकृष्णगंज.
पो०–माहिम (मुम्बई)